श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

# ॥ श्री निःश्रेयसम् ॥

## षाण्मासिक-पत्रम्

६


संपादकः
मुनिश्रीसम्यग्दर्शनविजयगणिवरः



वि.स.-२०७१
वर्ष-३
अङ्क-२






श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

# ॥ श्री निःश्रेयसम् ॥

## षाणमासिकपत्रम्

६


श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409



संपादकः
मुनिश्रीसम्यग्दर्शनविजयगणिवरः



वि.स.-२०७१
वर्ष-३
अङ्क-२

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीँ श्री शंखेश्वरपार्श्वनाथाय नमः ।।
।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।
।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।

**श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-६)**
वर्ष : ३ अङ्क = २

**निमित्तम् :**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां दीक्षाशताब्दी

**आशीर्वाद :**
सुविशालगच्छनायक पू.आ.श्री विजय**पुण्यपाल**सूरीश्वराः
प्रवचनप्रभावक पू.आ.श्री विजय**मुक्तिप्रभ**सूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री **वज्रसेन**विजयगणिवराः

**प्रेरणा :**
प्रसिद्धप्रवचनकार् पू.आ.श्री विजय**श्रेयांसप्रभ**सूरीश्वराः
प्रवचनकुशल पू.आ.श्री विजय**हेमप्रभ**सूरीश्वराः

**सम्पादनम् :**
पूज्यमुनिप्रवरश्री**सम्यग्दर्शन**विजयगणिवरः

**संशोधनम् :**
पूज्य साध्वीजीश्री **प्रशमनिधि**श्रीः
पं.श्री **अमृत**भाई पटेलः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

**प्रकाशनम् :**
वैक्रमीय २०७१, द्वि.आषाढ कृष्णा चतुर्दशी,
गुरुवार, दि. १३-८-२०१५

**प्रतयः** ७५०   **मूल्यम् :** २००

---

**आभारः....अनुग्रहः....अनुमोदनम्....**

प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजयश्रेयांसप्रभसूरीश्वराणामुपकारस्मृत्यर्थम्
गुरुभक्तपरिवारेण अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति...
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य**
**सञ्चालकगणः**

# संस्कृतिः धर्ममूलं, संस्कृतिमूलं तु संस्कृतम् ।

ऐन्द्राच्र्यभगवत्प्रज्ञप्तो धर्मो जीवनाधारः, सकलकल्याणजनकश्च। धर्मं विना जीवाः सुखं न लभन्ते। नक्रचक्रभृत्सागरवत् दुःखप्रचुरोऽयं संसारः तद्दुःखानां विनाशाय प्रवरो हेतु-धर्म एव।

तदस्तित्वं सुरक्षा च भारतवर्षीयासंस्कृतावेवास्ति। ऐदम्युगीनभौतिकवादेन साऽधुना नष्टप्राया इव जाता।

जडवादमूढा जना न जानन्ति यत् संस्कृतिनाशे धर्मनाशः धर्मनाशे च सर्वनाशो भावीति।

अनभिज्ञा एव जना सिन्धुमध्ये समीधार्थं नावं भिनत्ति।

मूढचित्ता एव चूतार्थमर्कबीजं वपन्ति।

अविदग्धा एव गोशीर्षचन्दनं दग्ध्वाऽङ्गारवाणिज्यं कुर्वन्ति।

तद्वत् मोहमूढा एव भारतीया स्वसंस्कृतिं परित्यज्य पाश्चात्यसंस्कृतिविकाशाय प्रयतन्ते। न जानन्ति यत् पाश्चात्यसंस्कृतिविकाशेन स्वाऽऽर्यसंस्कृतिविनाशः।

ततश्च धर्मनाशः धर्मनाशे देशनाशः, सुखनाशः, सर्वनाशश्च।

ततः संस्कृतिरक्षणार्थं संस्कृतभाषारक्षणमावश्यकम् यतः स्वीयभाषाभोजन-वेशपरिधानरक्षणेन संस्कृतिरक्षणं भवति। ततोऽधुनातनसमये संस्कृतभाषाप्रचार-प्रसारणमत्यावश्यकम् विभाति।

आङ्ग्लादिभाषायां जननीजनकनामान्यपि बहुमानपुरस्सरं नोच्यन्ते तर्हि विनय-विवेकगुणाः कथं स्थानमादधीरन्।

अधुना श्रूयते यत संस्कृतभाषायाः प्रचारः भारतदेशं त्यक्त्वा सर्वदेशेषु प्रवर्धते। पञ्चवर्षानन्तरं संगणकयन्त्रेऽपि संस्कृतभाषैव भविष्यति नाङ्ग्लभाषेति।

संस्कृतभाषाप्रभावेणाऽध्यात्मिकभावो वर्धते। शुद्धस्वभावः प्रवर्तते। वासनायाः विसर्जनं भवति। शरीरस्वास्थ्यं स्थैर्यमाप्नोति। मातृभाषासंस्कृतिरक्षणभावना च प्रबला भवति। ततोऽहर्निशं संस्कृतभाषा वाच्या, श्रोतव्या, पुनः पुनः पठनीया च। एवं संस्कृतेर्धर्मस्य च मूलं संस्कृतभाषैवेत्यामनन्ति विदुषः। अस्तु

– परमश्रद्धेय गुरुदेवश्रीमद्विजयश्रेयांसप्रभसूरीश्वर-
चरणसेवाहेवाकी मुनिसम्यग्दर्शनविजयगणिवरः

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| प्रतिघोषः | | १ |
| **खण्ड-१ : प्राचीनकृतयः** | | |
| स्नात्रपञ्चाशिका | साध्वीजीश्री चिन्तनप्रियाश्रीः | ३ |
| **खण्ड-२ : यशोप्रज्ञादर्शनम्** | | |
| परमज्योतिःपञ्चविंशतिका | आ.श्री कल्याणबोधिसूरिः | २३ |
| शुभानुबन्धनम् | आ.श्री कल्याणबोधिसूरिः | २४ |
| वृत्तं यशोविजयवाचकपुङ्गवानाम् | मुनिश्री सम्यग्दर्शनविजयगणिः | २६ |
| यशोगूर्जरस्तवनानुवादः | मुनिश्री आत्मदर्शनविजयः | ३० |
| **खण्ड-३ : दीक्षाशताब्दिभावाञ्जलिः** | | |
| श्रीरामचन्द्रीयमहाकाव्यम् | पंन्यासश्री मोक्षरतिविजयगणिः | ३३ |
| सूरिरामवचनामृतम् | मुनिश्री प्रशमरतिविजयः | ४१ |
| रामचन्द्रीयवचोऽमृतम् | साध्वीजीश्री क्षमानिधिश्रीः | ४६ |
| **खण्ड-४ : अर्वाचीनकृतयः** | | |
| प्रवचनसारोद्धार खण्ड-१ प्राक्कथनम् | मुनिश्रीमुनिचन्द्रविजयः, मुनिश्रीपद्मसेनविजयः | ४९ |
| आत्मसंरक्षणम् | आ.श्रीकल्याणबोधिसूरिः | ५७ |
| आगमस्यामृतम् | आ.श्रीकल्याणबोधिसूरिः | ५८ |
| ऊपधानतपमालारोपणश्लोकः | मुनिश्री धुरंधरविजयः | ५९ |
| चारित्रसप्तविंशिका-५ | मुनिश्री सम्यग्दर्शनविजयगणिः | ६० |
| ग्रन्थपरिचयः | मुनिश्री श्रुततिलकविजयः | ६४ |
| संवेगरसरसायणम् | मुनिश्री रैवतचंद्रविजयः | ६८ |
| हेमार्हद्देशनासारस्तवः | मुनिश्री ज्ञानभूषणविजयः | ७२ |
| बहुरत्ना वसुन्धरा | मुनिश्री दर्शनरक्षितविजयः | ७६ |
| उपदेशकथा | मुनिश्री दर्शनरक्षितविजयः | ७७ |
| आज्ञायामेव हि सर्वार्थसिद्धिः | मुनिश्री प्रशमरक्षितविजयः | ७९ |
| श्रीसरस्वतिस्तुत्यष्टकम् | मुनिश्री प्रशमरक्षितविजयः | ८० |
| श्री शंखेश्वरपार्श्वजिनस्तोत्रम् | श्रद्धेयचरणः | ८२ |
| श्रेयस्करी जिनस्तुतिचतुर्विंशी | साध्वीजीश्री प्रशमनिधिश्रीः | ८४ |
| प्रार्थना | श्री शान्तप्रकाशः सत्यदासः | ८९ |
| नैतिकताविवेकः | शान्तप्रकाशः सत्यदासः | ९० |
| मानसोल्लासः | डॉ. एच. वि. नागराजराव् | ९२ |
| सिद्धार्थः | डॉ. रूपनारायणपाण्डेयः | ९६ |
| १५ अगस्त्यः | डॉ. आचार्य रामकिशोरमिश्रः | ९९ |
| काव्यशास्त्रविनोदेन | साध्वीजीश्री प्रशमनिधिश्रीः | ९९ |
| सङ्क्लेशनाशाय | अमृत पटेल | १०२ |
| वैश्विकः सखा | प्रो.चन्दुलाल व. ठकरालः | १०४ |

# प्रतिघोषः

डॉ. रुपनारायण पाण्डेय
मनीकापुर (चाँदपुर)
सोरामः, प्रयागः, उ.प्र-२१२ ५०२
मो.:९१२६१ ३०५७५

मान्याः सम्पादकवर्याः

सादरं प्रणामाः।

तत्रभवद्भिः प्रहितं 'निःश्रेयसम्' (संस्कृतपत्र-३) अधिगतम्। विगतवर्षे नवम्बरमासे अस्यैव पत्रस्य द्वितीयोप्यङ्कोधिगतो बभूव। अस्य पत्रस्याङ्कद्वयस्य प्रेषणाय हार्दिकीं कृतज्ञतां विज्ञपयामि। सम्पादकीयैस्तत्रभवद्भिः सत्यं निगद्यते साम्प्रतमर्थलोभात् कोऽपि संस्कृतभाषां पठितुं नैव वाञ्छति। संस्कृतज्ञा अपि स्वसन्तती संस्कृतभाषां पाठयितुं नाभिलषन्ति। अस्यां विषमपरिस्थितौ 'निःश्रेयसम्' इति संस्कृतपत्रस्य प्रकाशनस्योद्यमो नितरां प्रशंसनीयतरोऽस्ति । वस्तुतो न केवलम् आध्यात्मिकरहस्यानां ज्ञानाय सुरभारतीसाधना समपेक्ष्यते, अपि तु भारते याः भाषाः साम्प्रतं विद्यन्ते, तासां शब्दानां मूलं स्वरूपं, तेषां च शब्दानां सांस्कृतिकं रहस्यं साहित्यिकञ्च सौन्दर्यं समधिगमनाय संस्कृतभाषाया अध्ययनस्यातितमाऽपेक्षा पदे पदे विराजते। इदानीं संस्कृतज्ञैः वैज्ञानिक-विषयाणामुपरि लेखाः प्रस्तोतव्याः। अस्य पत्रस्य द्वितीये विभागे नूतनानां संस्कृतग्रन्थानां पत्राणाञ्च परिचयः प्रदेयः। पत्रस्यास्याभ्युदयं सततं कामये। जयति संस्कृतं संस्कृतिश्च।

* * *

# प्रतिघोषः

विद्वान् शङ्करभट्ट, अद्वैतवेदान्त-
प्रध्यापकः श्री रा. रा. सं. कॉलेज,
स्वर्णवल्ली-शिरसि-उ.क.

आत्मीय बन्धो!

नमस्ते!

'श्री निःश्रेयसम्' (संस्कृतपत्रम्) प्राप्तम्। परमपूज्यानां दीक्षाशताब्दी-निमित्तं प्रकाशं नीतं, अद्यत्वे संस्कृतभाषायां दुर्लभं, महता प्रयत्नसाध्यमिदं कार्यं समाकलय्य मोमुद्यते मे मनः।। अनन्तप्रणामपुरस्सरं धन्यवादाः।

* * *

पूज्यपादाः श्रीमत्सम्यग्दर्शनविजयगणिवर्याः।

सविनयं वन्दना स्वीकार्या।

भवद्भिः प्रेषितम् ''निःश्रेयसम्-५'' अधिगतं सोत्साहमधीतमपि।

अत्र ''सद्भूता भावाञ्जलिः'' तथा ''वदन्ति के किम्?'' इति लेखद्वयमतीव रुचितमतः आनन्दजनकम् सिद्धम्। एतदर्थं भूयो भूयो धन्यवादान् समर्पयामि।

अस्मिन्नङ्के ''रू'' स्थाने ''रु'' मुद्रितम् द्वासप्ततिवारम्, अन्ये पञ्चविंशतिः त्रुटयोऽपि दृष्टाः मया (द्विप (द्वीप) सिमन्तिनी (सीमन्तिनी) मिमांसा (मीमांसा) स्थानत्रये भवच्छदृशीम् (भवत्सदृशीम्) स्थानचतुष्टये अनुकुल (अनुकूल) इत्यादयः, किन्तु ते दोषा अधुना उल्लेखयितुम् नालम् यतोऽङ्कः प्रकाशित एव)

आगामिनि अङ्के प्रकाशनार्थम् अहमेकं लेखम् अनेन पत्रेण संलग्नम् करोमि।

यदि भवद्भिः रुचितम् स्यात् तर्हि प्रकाशनार्थं स्वीकुर्वन्तु।

पुनर्धन्यवादाः।

भवदीयः

**- सत्यदासः**

॥ श्री ॥

# निःश्रेयसम्

षाणमासिकपत्रम्

६

खण्ड – १

प्राचीन –

कृतयः

# स्नात्रपञ्चाशिका

- *सा.श्री चिन्तनप्रियाश्रीः

(इयं कृतिः सम्यक्त्वदीपिका-स्नात्रपञ्चाशिका-नाम-कथावल्लीसमन्विता-सम्यक्त्व-भाववर्धिनी समस्ति। यद्यपि स्नात्रपञ्चाशिकाः प्रभूततराः सन्ति तत्रेयं सम्यक्त्वदीपिका भवानन्तदुर्लभ-सम्यक्त्व-प्रदात्री। श्रमणभगवन्महावीरशासने सूरिश्रेष्ठश्रीउदयोदधिप्रवरैः वैक्रमीय १८५४ तमे समे संरचिता। वैक्रमीय१९५७ तमे समे कल्लारामनाथलिखिता लब्धा च बडौदानगरस्थितजैनज्ञानमंदिरे ६३ तमेऽङ्के संस्थिता । कथाग्रंथोऽयं सत्यतत्त्वप्रदायको भविष्यतीति शम् एतद्-बृहत्तरग्रन्थः, तेन चतुर्धा विभक्तः द्वितीयः प्रस्तूयते। **संपादिका**)

*** यत्रैव शैले खलु पञ्च पाण्डवाः, युधिष्ठिराद्या विजितेन्द्रियाश्च (? ते)।**
**कुन्त्या समं विंशतिकोटिसाधुभिः, सार्धं शिवर्द्धिं च समाससादिरे ।।११।।**
**([1]उपजाति०)**

*** जिनाधीशार्चनां कुर्वन्, भावेन कुसुम-फलैः।**
**लभते शाश्वतं शर्म, भव्यः सागरदुस्थवत् ।।२।।**

**अस्यार्थः**- यो भव्यजीवः सुगन्धकुसुमैः स्वादुफलैश्च श्रीजगत्परमेश्वरस्यार्चां विधत्ते। स मानवः शाश्वतं शर्म मोक्षसुखं प्राप्नोति। सागरदरिद्रिवत् । अत्र तत्सम्बन्धः उच्यते -

श्रीपुरनगरे एकः सागरनामा दरिद्री वसति, परगृहे कार्यं कृत्वा, आजीविकां कुरुते। अन्यदा समये, सागरः द्रङ्गमध्ये परिभ्रमन् सन्, धर्मशालां दृष्ट्वा निरीक्ष्य चोपाश्रयमध्ये गतः, क्षमाधरान् शान्तिधरान् मुनीन् नमस्कृत्य, पुरत उपविष्टः, स्वीयहस्तकमलं संयोज्यैवं

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।
१. इन्द्रवंशा-वंशस्थयोरियमुपजातिः दृश्यतां शिशुपालवध० (१२-६१)

पृच्छति स्म, अहो ज्ञानिगुरो! अहं दुक्खितो दरिद्री निर्धनः परगृहेऽन्नाशां कुर्वन् उदरवृत्तिं करोमि। तस्मान्मयि दयां विधाय, कश्चिदुपायं कथय। येनाहं दरिद्रतां विहाय, धनी सुखी च भवेयम्।

तदा मुनीश्वरेणोक्तं 'अहो सागर! त्वं शुभभावेन श्रीजिनेश्वरस्य कुसुमेन सेवां कुरु, यथा तव दारिद्र्यं दूरे गच्छेत्, एवं श्रुत्वा हर्षोत्कर्षेण सदा पुष्पैः परमात्मबिम्बं सागरः समानर्च्च, प्रत्यहं प्रभुसेवाप्रभावात् सागरगृहे लक्ष्मी स्थिरीभूता, अनुक्रमेण धनी सुखी च जातः। प्रान्ते मनुष्यायुः समाप्तीकृत्य, स्वर्गलोके सुरोऽभूत्। सुरसुखं भुक्त्वा ततश्च्युत्वा रमापुर्यां प्रजापालभूपस्य पट्टराज्ञीकुक्षौ तनयत्वेनावतीर्णः, नवमे मासे प्रसूतः, वीरसेन इति नाम दत्तम्, [1]समस्तकलाभ्यस्तः बालभावं त्यक्त्वा, यौवनत्वे भूपेन पट्टाभिषिक्तः वीरसेनो राजा जातः। विपुला संपत्तिर्लब्धा। एकदा गवाक्षस्थितेन वीरसेनभूपेन गोचर्यायां चरन् साधुः दृष्टः। दृष्ट्वा च जातिस्मरणमुत्पन्नं, पूर्वभववृत्तान्तः पर्षदाग्रे कथितः,विशेषां जिनार्चां कृत्वा, प्रान्ते संयममादाय, पुनर्द्वितीयवारं देवो भूत्वा, मनुष्यत्वमासाद्य, मोक्षं प्राप्स्यतीति।

इति **श्री सम्यक्त्वदीपिकायां पुष्पपूजाविषये सागरकथा षोडशी॥१६॥**

---

*** नमि-विनमि-भुवीन्द्रावादिसेवापरौ यौ**
**गगनचरपती तौ प्रापतु मोक्षलक्ष्मीम्।**
**विमलगिरिवरे वै कोटियुग्मर्षिभिश्च**
**सह, हि विमलबोधप्राप्तिपुष्ट्यैकहेतौ॥१॥**

*** जिनेन्द्रस्य पुरो दीपपूजां कुर्वन् जनो मुदा।**
**लभते पृथुराज्यादिसम्पदं धनदुःस्थवत्॥२॥**

**अस्यार्थः** - यो जीवः श्री जिनेन्द्रपुरतः मुदा प्रमोदेन दीपपूजां विदध्यात्, स पुमान् पृथु-विस्तीर्णाः राज्यादिसम्पदः प्राप्नोति।

किंवत्? धनदरिद्रिवत्, अत्र तत्सम्बन्ध उच्यते, अत्र कथा -

दाहिणड्ढभरहे मगधदेसे, पउमपुरनाम नगरं होत्था, तत्थ कलाकेलिनामा राया होत्था॥ वण्णओ॥ जस्स रण्णो पणलक्खा आसा आसी, छ सया मयमत्ता मयगलसेणा

१. अभ्यस्तसमस्तकलः 'इति सुष्ठु पदं स्यात्। (अमृत)

संति, रहाणीयस्स पयाणीयस्स संखा न हवइ। एरिसी रज्जसंपदा लद्धा, पुण्णप्पभावाओ एवं रज्जसिरिं कारेमाणे , भोगाइं भुंजमाणे, सुहंसुहेणं कलाकेलिराया विहरई। अह अण्णया कयाइं पउमपुरस्स परिसरे पउमवण्णचेइए पउमुज्जाणे तेवीसमो तित्थंगरो पुव्वाणुपुव्विं चरमाणो गामाणुगामं विहरमाणो, अणेग गणहरसाहुपरिवारसंजुओ भवणवइ-वाणविंतरजोइए(स)विमाणवासी देवकोडिहिं परिवुढो, पासो पुरिसादाणीओ केवली सव्वण्णू सव्वदरिसी समोसरिओ, चउव्विहसुरगणेहिं समोसरणं रइयं, इओ समोसरणवत्तव्वया भाणियव्वा, जाव पुव्वदारेणं सामी समागया, सिंहासणे उवविट्ठा बारसपरिसा आगया, कलाकेलिराया अण्णे वि नगरनिवासिणो लोका वंदणत्थं समागया तीसाए महइमहलीयाए परिसाए पुरओ धम्मो कहिओ तं जहा-

**पूआ जिणिंदेसु, रई वएसु, जुत्तो य सामाइयपोसहेसु।**
**दाणं सुपत्ते, सवणं सुसत्थे, साहूसु सेवा, सुरलोयमग्गे ।।१।।**

**मन्नहजिणाणं आणं, मिच्छं परिहरह धरह सम्मत्तं।**
**छव्विह आवस्सयंमि य, उज्जुत्तो होइ पइदिवसं ।।२।।**

**पव्वेसु पोसहवयं, दाणं शीलं, तवो य भावो य।**
**सज्झाय नमोक्कारो, परोवयारो य जयणा य ।।३।।**

**जिणपूआ जिणथुणणं, गुरुथुअ साहम्मियाण वच्छल्लं ।**
**सव्वविरई मणोरह, एमाई सड्ढ किच्चाइं ।।४।।**

इच्चाई ववहारधम्मो, भगवया कहिओ। पुणरवि निच्छयधम्मेण, उवदिसइ धम्मं-

**रयणत्तयं न वट्टई, अप्पाणं मुइत्तु अण्णदव्वंमि।**
**तम्हा तत्तियमईओ, हंदिओ दुमोक्खकारणं आया ।।१।।**

**जीवो उवओगमओ अमुत्त-कत्ता-सदेहपरिमाणो।**
**भोत्ता संसारत्थो सिद्ध सो विस्ससो सुगई ।।२।।**

भो! भो! भव्वजीवा! मोहाइअट्ठ कम्मवसेण संसारी जीवो चउगई संसारघोरकंतारे जम्म-मरणाइदुक्खाउले वारंवारं परिभमइ,

सो अकामनिज्जरापुण्णोदयओ अव्ववहाररासीओ ववहाररासिम्मि आगच्छई, अहापवत्त(त्ति)करणाओ जीवो सत्तकम्मपयडीयाणं पत्तेयं पत्तेयं एगा कोडाकोडीओ कुणइ, पलिअअसंखिज्जभागूणा एगा कोडाकोडी करेइ, गिरिनइपडियउवलनाएण हस्सट्ठिइं करेइ,

सुहाणुभावं बंधइ, तओ अहापवत्तिकरणेन(ण) जीवा बायरपुढवाईसु पज्जत्तभावे उप्पज्जइ, तओ पच्छा कोइ भव्वजीवो सन्निपंचिंदिओ मणुस्सेसु परित्तसंसारि आरियखेत्ते सुकुले उप्पज्जइ, तओ माणुस्सखित्तकुलगुरुइच्छाइधम्मसामग्गिं पप्प, सुद्धऽप्पसहावं एवं चिंतेइ अहवा गुरूवदेसाओ अज्झप्पधम्मभावणं भावेइ, तं जहा-

एसो मम अप्पा असंखिज्जपएसिओ, दव्वट्ठियाए एगो, पज्ज(व)ट्ठियाए अणेगपरिणाममईओ, नाणदंसणसुद्धगुणपज्जवमओ, अणंता अत्थिधम्मा, अणंता नत्थिधम्मा, अणेगसामण्णधम्मा, अणेगविसेसधम्मा, समत्थपुग्गलभावरहिओ, तिण्ह वि कालेण वत्थुगतभावओ पुग्गलवज्जिओ अणंतचउक्कमइओ सागारोवओगरूवो अणागारोवओगसहावो, कयाचिदपि जिवणि (जीवो णिअ) भावं न जहइ, एसो मे अप्पा सासओ, असरीरी, अलेसी, अजोगी, अकसाई, अकिलेसी, परमचिदानंदसरूवी, अवण्णे, अगंधे, अरसे, अफासे, सभावओ संसारपरिणइवज्जिओ, तिण्ह वि कालेण चेयणासरूवी सिद्धसरूवी दव्वट्ठियमुक्खयाए णिच्चो, पज्ज[व]ट्ठियाए से णं अणिच्चो रयणत्तयमइओ आया, सद्धाभासणरमणलक्खणो त्ति', मित्तधम्मेणं उवादाणं परिसुज्झइ तेण कारणेणं जीवा! सुद्धप्पो निच्चं झायव्वो। एयारिसी अमियसरिसी **पासनाहेण** धम्मदेसणा कहिआ।

तं निसम्म रायाइआ पुरजाणवया हट्ठा तुट्ठा चित्तमाणंदिअपीइमणा परमसोमणस्सिआ हरिसवसविसप्पमाणहिअया धाराहयकयंबपुप्फगं पिव समुस्स-सियरोमकूवा अट्ठिमज्जापज्जंतधम्माणुरागरत्ता जाया। केई जीया चारित्तधम्मं पडिवन्ना, केइ पाणिणो सम्मत्तमूलं पंचाणुव्वइयं सत्त सिक्खावयं दुवालसविहं सावगधम्मं पडिवन्ना, पुणरवि केवि जीवा राइभोयणविरमणं अणंतकायवज्जणअभक्खपरिहाणिवासीविद्दल-वज्जणाइ पच्चक्खाणं करेन्ति, तयणंतरं परिसा पडि[ग]या,

तओ पच्छा कलाकेलिराया करकमलं संजोजि[इ]ऊण पुच्छइ - अहो! भयवं!करुणासागर! जयपरमेसर! भुवणदिणेसर! केण कम्मुणा [मए]रज्जसिरी पत्ता लद्धा अभिसमन्नागया। तस्स कारणं मम परिकह(ह), तया पाससामिणा भणियं - अहो नरेसर! तुज्झ पुव्वभवचरितं सुणेह,

तेणं कालेणं, तेणं समएणं, इहेव जंबुदीवे दीवे भारहवासे दाहिणड्ढभरहे अंगजणवए रमापुरी नयरी हुत्था, जियारी राया रज्जं करेइ, तत्थ पुरे एगो धणनामो निद्धणो परिवसइ, सो [1]कुत्थलमज्झे मरिचपिपलीमूलकुंकुमजीरगाइवत्थूणं गिण्हिऊण नगरपरिसरे कय -

१. कोथळो

विक्कयं काऊण नियआजीविगं उअरपूरणं कुणइ, अन्नया कयाइ रम्मापुरि आसन्नउज्जाणे बावीसमो तित्थंगरो बालबंभचारी राइमइवल्लहो अट्ठारसगणहरसंयुत्तो(संजुत्तो)-अट्ठारससहस्ससाहुपरिवारकलिओ, चालीससहस्सअज्जिआगणेण परिवरिओ, नेमिनाह-भगवओ नीलुप्पलदेहधरो दसधणुउच्छूढसरीरो सव्वण्णुसव्वदरिसी चउविहदेव -निकायसेवियचलणो अरिट्ठनेमि[मी] समोसरिओ, देवेहिं समोसरणं रइअं, मज्झभागे सिंहासणे सामी उवविट्ठो, परिसा आगया, धम्मो कहिओ तं जहा-

जह जीवा बज्झंति, मुच्चंति य, तहेव य, सव्वकम्मं खवेऊण सिद्धिं गच्छइ नीरया...इच्चाइ धम्मदेसणासमए धणवणिओ आगओ, तम्मि समए भगवया एवमुवदीसइ - जो भव्वजीवो जिणेसरस्स पुरओ दीवपूअं कुणइ, सो नरो रज्जसिरिं पाविऊण मुक्खं गच्छिज्जा 'एवं धम्मोवदेसं सुच्चा निसम्म हट्ठतुट्ठो धणो मणसि एवं चिंतइ - अहं जिणेसरस्स अग्गे दीवपूजं निरंतरं करेमि, एवमभिग्गहं गिन्हिऊण नेम[मि] नाहं वंदिऊण नियगेहे धणो गओ, सामिणो वि बहिआ जि[ज] णवय विहारं करेंति, अहुणा धणवणिओ पदीपपूअणं निरंतरं कारेमाणे मणुस्साउयं बंधिऊण, तओ पच्छा चवेऊण धणवणिओ दीवपूआपभावेण कलाकेलिनामा राया जाओ, तुम्हं एरिसी लद्धी पत्ता सा दीवपूआपभावेणं, महाविदेहवासे सिज्झिस्ससि, एरिसं धम्मुवएसेणं पाससामिणा भणियं निसम्म हट्ठतुट्ठो कलाकेलिभूवो नियगेहे समागओ, पइदिवसं सविसेसओ जिणपूअणं करेइ, सुहंसुहेणं चिट्ठइ, परंपरया सिज्झिहिति।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां दीपपूजाविषये धनवणिक् कथा सप्तदशमी - ।।१७।।**

---

**❋ विमलगुणसमूहैः सम्भृतस्वान्तरात्मा**
**स्वपदरमणभोक्ता दर्शनज्ञानधर्ता।**
**निखिलशमधनानां तिसृभिः कोटिभिश्च,**
**सममममृतपदर्धिं प्राप यत्रैव रामः।।१।।**

**❋ पुष्पैः सुगन्धिभिः पूजां वितन्वानो जिनेशितुः।**
**हरिनैगमवज्जीवो, लभते सुखसम्पदम्।।२।।**

**अस्यार्थ :-** यो जीव: सुगन्धिभि: पुष्पै: जिनेश्वरस्य पूजां वितन्वानो कुर्वाण:, स जीव: सुखसम्पदं लभते हरिनामा वणिक्वत्। अत्र तत्सम्बन्धो व्याख्यायते-

मुञ्जपुर नगरे बहव: श्राद्धा: जैनदर्शनरागिण:, अधिगतजीवाजीवादिपदार्था:, उपलब्धपुण्यपापा:, सम्यक्त्वधारका: परिवसन्ति स्म। ते अन्यदा समुदायीभूय आषाढ-चातुर्मासिकदिने श्रीआदीश्वरचैत्यालये अष्टप्रकारीं पूजां चक्रिरे। केपि भव्या: केशर चन्दनादीनि घर्षयन्ति स्म, अन्ये भावुका: कृष्णाऽगरुकस्तुरिकाम्बरधूपै: धूपयन्ति स्म, अपरेऽपि श्राद्धा: विविधवर्णां पुष्पमालां विरचयन्ति स्म, अन्ये शुद्धश्रद्धान्विता: भावनां भावयन्ति स्म। तस्मिन् अवसरे एको हरिनामा वणिक् चैत्यमध्ये समागत:, तेन प्रभुमुद्रा दृष्टा, पुन: श्राद्धा: परमात्मबिम्बस्य पूजां कुर्वन्तो निरीक्षिता:, निरीक्ष्य चैवमचिन्तयत्, 'अहो श्रद्धालुभिरेतै: पूर्वजन्मनि परमात्मपूजा: कृता: सन्ति, तदाऽस्मिन् भवेऽतुलर्द्धि: प्राप्ता:। पुन: सम्प्रति सेवां कुर्वन्ति, तत्प्रभावादग्रेतनभवेपि सौख्यं प्राप्स्यन्ति, एवं चित्ते विचार्य हरिरेवमचकथत्-अहो मया पूर्वभवे जिनेश्वरस्य पूजा न कृता, यत: उक्तं-नो दानं विहितं तपो न चरितं! [ ] इत्यादि वचनात्। अनया रीत्या स्वकीयपश्चात्तापं कुर्वत: परमात्मपूजनस्य भाव उल्लसित:, तदाजीर्णवस्त्रप्रान्ते एको द्रम्मो नि:सृत:, तं मालिकस्य समर्प्य पुष्पमाला गृहीता, पश्चात् शरीरशुद्धिं चित्तशुद्धिं च विधाय हरिवणिक् बहुभावत: प्रभुमर्चति स्म। पुष्पमालापि प्रभुकण्ठे आरोपिता। तदवसरे हरिणा बहु पुण्यप्रकृतिरुपार्जिता। यत:

**केचित् पुण्यमुपार्जयन्ति गुणिन: पूजादिभि: प्रत्यहं,**

**केचित् संस्तुवते परेऽपि विबुध: पश्यन्ति [1]वावन्दते।**

**सच्चन्द्रोदयधूपदीपकलशान् भृङ्गारघण्टादिकान्,**

**दत्वा श्री जिननाथसद्मनि मुदोपार्जन्ति मुक्ते: सुखं।।**

ततो हरिवणिक् हृष्ट: सन् साधुसमीपे गत्वा, धर्मं श्रुणोति, हृदये शुभभावनां भावयन् घनपुण्योदयं उपार्ज्य, ततश्च्युत्वा अवन्तिपुरे राजतनयत्वेनावतीर्ण:, समये जन्म जातं, अभ्यस्तसकलकल: यौवने राजा जात:, महाप्रतापी जात:, राज्यसुखं भुक्त्वा, विपद्य अङ्गदेशे राजा जात एवं निरन्तरं सप्तभवं यावद् राज्यपदं भुक्त्वा अष्टमभवे राज्यं त्यक्त्वा,

१. एकवचनमत्र न साम्प्रतम्-यत: 'विबुधा:' इति कर्तृपदं बहुवचनान्तं अस्ति। 'वन्दन्ते' इति कृते छन्दोभङ्ग: अत: विशेषेण बोधन्ते इति कर्त्तरि क्विप्प्रत्यये सति 'विबुध्' शब्द:, तस्य बहुवचनं 'विबुध:' जायते-अमृत।

चारित्रं प्रपाल्य, समग्रकर्मक्षयं कृत्वा, मोक्षं गतो हरिवणिक्।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां पुष्पपूजोपरि हरिवणिक् कथा अष्टादशमी समाप्ता ।।१८।।**

---

**❋ द्रुपदभूपसुता विमलाशया, सकलशीलवतीषु शिरोमणिः।**
**विषमबाणनिवारणतत्परा, निजपतीन् प्रति नन्तुमिहागमत्।।१।।**

**❋ अर्चयन् श्रीजिनाधीशं, श्रीरावणनरेश्वरः।**
**अर्जयामास कल्याणाऽऽगमयोग्यं [१]वृषं क्षणात्।।२।।**

**अस्यार्थ :-** यो जीवः जिनाधीशं भावतः अर्चयति, स मर्त्यः श्रीरावणनरेश्वरवत् कल्याणप्राप्तियोग्यं [१]वृषं-पुण्यं अर्जयामास (अर्जयति)। अत्र रावणसम्बन्धः लेशतः कथ्यते-

लङ्कानगर्यां रावणः प्रतिवासुदेवो रराज, एकस्मिन् प्रस्तावे दिग्साधनार्थं सैन्यसहितः रावणनरेश्वरः प्रचलितः । मध्याह्नसमये समस्तसैन्यं कस्मिंश्चिद् वने उत्तरितं, तदा राज्ञापूजाकरणार्थं स्नानं कृत्वा, सेवकाय एवं प्रतिपादितं, अस्मिन् पटमन्दिरेऽस्मदीयं गृहचैत्यं स्थापय, यथाहं पूजयामि। तदा मन्त्रीश्वरादिसेवकजनैः प्रोक्तं -हे स्वामिन्! देवगृहं तु तत्रैव विस्मृतं, प्रतिमापि गृहे विस्मृता। अतःकारणात् रसवती निष्पन्नास्ति, पूजां विनैव भोजनार्थं समागच्छत। तदा रावणेन प्रोक्तं-यद्यपि क्षुधार्त्या मत्प्राणत्यागो भूयात्, तथापि जिनार्चां विना नाहमद्याम्, अस्मात् कारणात् लङ्कानगर्यां गत्वा मम चैत्यमत्रानयत। यथा पूजां कृत्वा अहं भोजनं कुर्याम्, एवं श्रुत्वा मन्त्रीश्वरादिसैवकैः प्रोक्तं-अहो महाराज! आत्मीया नगरी दूरे स्थिता, कथमत्र चैत्यं आगच्छेत्, तस्मात् युष्माभिः एव वालुकामयीं पार्श्वप्रतिमां निष्पाद्य, तां प्रपूज्य भोजनं कुरुध्वम्, तदा दशकन्धरः रावणः मन्त्रीश्वरस्य वाक्यमङ्गीकृत्य, गोमयमिश्रितां वालुकामयीं पार्श्वप्रतिमां कृत्वा, भावतः पञ्चपरमेष्ठिना प्रतिष्ठाप्य प्रपूजयामास। मन्त्री-सामन्तप्रमुखाः सर्वेपि जना जिनं प्रणेमुः, पश्चात् रावणराजा भोजनं चक्रे, समस्तलोका अपि भोजिताः, तदनन्तरं रावणभूपेन तस्मिन् वने नवीनं चैत्यं कृत्वा, तन्मध्ये पार्श्वबिम्बं स्थापितं, तदऽभिधानं 'रावणपार्श्वनाथ' इति प्रसिद्धं जातम्। देवताऽधिष्ठितं समहिमं तीर्थं मत्वा, बहवो लोकाः स्वदेशिनः परदेशिनो वा समाजग्मुः

---

१. वृषो गव्याखुधर्मयोः-हैमानेकार्थसङ्ग्रह-५५८१ २. नैतत् समीचीनम्।

अद्यापि श्रावकलोकास्तथा म्लेच्छजनाश्च रावणपार्श्वबिम्बं पूर्वदेशे पूजयन्ति, देवगृहस्य द्वाराणि उद्घाटितानि एव तिष्ठन्ति। अन्यदा प्रासादपातनार्थं म्लेच्छाधिपाः समागतास्तदा तस्य साक्षात् चमत्कारः प्रदर्शितः, तदा पार्श्वयक्षजयः(जातः), प्रणिपत्य व्यावृत्य स्वदेशे गता म्लेच्छाः। ईदृशोऽखण्डमहिमा श्रीपार्श्वनाथस्य ज्ञातव्यः। ततो रावणोपि दिग्विजयं कृत्वा, तीर्थंकरनामकर्म बद्ध्वा प्रान्ते विपद्य, महाविदेहे सेत्स्यति।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां नवीनबिम्बपूजाविषये रावणनृपकथा एकोनविंशति समाप्ता १९**

---

**✲ चतुर्गतेः प्रोद्भवदुःखहन्तृ, सत्पञ्चज्ञानं लभते (ऽत्र) कर्ता।**
**चर्तुमुखे आदिजिनेश्वरस्य, मूर्त्तीश्चतस्रः प्रणमामि भक्त्या।।१।।**
**अकुर्वन् भोजनं तीर्थकरपूजां विना जनः ।**
**अचिराल्लभते मुक्तिसौख्यं रामनरेन्द्रवत् ।।२।।**

**अस्यार्थ :** - यो मनुष्यः तीर्थंकरपूजां विना भोजनं न कुर्वीत, स मर्त्यः बहु राज्यलक्ष्मीं समासाद्य अचिरात् स्तोककालेन, मुक्तिसौख्यं लभते रामनरेन्द्रवत्, अत्र तच्चरित्रं किञ्चिल्लिख्यते-

अयोध्यानगर्यां दशरथराजा राज्यं चकार, तत्पुत्रौ रामचन्द्रलक्ष्मणाभिधौ, परस्पर-प्रीतिभाजौ विरेजतुः। अथान्यदा कुतश्चित् कारणात् पित्रादेशवशेन रामचन्द्रलक्ष्मण-सीतादयः वनवासे गताः। रामचन्द्राद्याः सम्यग्दर्शनिनः सत्त्वाः परमात्मपूजां विना त्रयोऽपि जीवा अशनादीनि नो चक्रुः। एवं जिनदर्शनाऽभावेन दिनत्रयं जातम्। परं भोजनं न व्यधुः,

**ये उत्तमाः सुकृतिनस्ते प्राणत्यागेऽपि स्वीयाऽभिग्रहं न [1]बभञ्जुः।**

अष्टमतपःप्रान्ते मध्यरात्रिसमये तपोमहात्म्यात् श्रीधरणेन्द्रः समागत्य श्रीपार्श्वनाथस्य द्वे मूर्ती रत्नमय्यौ ददौ। ततश्च ते रामचन्द्रादयो प्रमुदिताः । तदनन्तरं प्रभातसमये शरीरादित्रिकशुद्धिं विधाय, श्री पार्श्वप्रतिमाञ्च प्रपूज्य भोजनं विदधुः। अथ तत्रैव वने त्रयोपि भव्यजीवाः परमात्मबिम्बं नित्यं पूजयन्ति एवं द्वादशवर्षप्रान्ते दशकन्धरं निहत्य, लङ्कापुर्यां स्वीयाज्ञां प्रवर्तयित्वा (प्रवर्त्त्य), सीतां समादाय, ततश्चाऽयोध्यायां समागत्य, नगरमध्ये नूतनं सिद्धालयं विरचय्य, ते बिम्बे रामः स्थापयामास, बहुभक्त्या सर्वेपि जनाः

१. भञ्जन्ति 'इति सुष्ठु वर्त्तमानकालिकं रूपम्।

ते अर्चयामासुः, तस्य यः सेवां कुर्यात् स नरोऽभीष्टसिद्धिं लभेत। ततस्तदन्तरं रामो राज्यसुखं भुक्त्वा, दीक्षां गृहीत्वा, शिवं गतः। सीता तु दीक्षां लात्वा अच्युतेन्द्रत्वे समुत्पन्ना, लक्ष्मणोपि सद्गतिं गन्ता परमात्मपूजाप्रभावतः।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां श्री जिनपूजाविषये रामचन्द्रकथा विंशतितमी ।।२०।।**

---

**✻ श्रीमच्छ्रीआदिदेवः शतमखप्रणतस्त्यक्तमोहान्धकारः ।**
**प्रोद्यत्कल्याणकाङ्गः सकलतनुभृतां श्रेयसां पुष्टिहेतुः ।।**
**जन्तूनां वै समेषामभयकरणतः प्रेप्सितस्फारकीर्तिः।**
**श्रीमत्सिद्धाचलस्थः स जयति जगदानन्दकर्ता जिनेन्द्रः।।१।।**

**✻ निश्चयाद् भव्यजीवेन पूजा कार्या जिनेशितुः।**
**दमयन्तीव कल्याणसुखसन्ततिदायिनी ।।२।।**

**अस्यार्थः-** यो मनुष्यः निश्चयात् शुद्धभावात् श्री जिनेश्वरस्य पूजां विदध्यात्, स नरः कल्याणसुखसन्ततिं प्राप्नुयात्, दमयन्तीवत्। अत्र तत्कथा कथ्यते।

जंबूद्वीपे भरतखण्डे कुण्डनपुरनगरे भीमराजा राज्यं चक्रे, तस्य पत्नी धारणी, तत्पुत्री दमयन्ती, सा जैनधर्मानुरागिणी शुद्धसम्यग्दर्शनधारिणी, निरन्तरं श्री शान्तिनाथं पूजयति स्म।

अथ सा दमयन्ती यौवनावस्थां प्राप्ता। तदा पित्रा स्वयंवरमण्डपो मण्डितः महोत्सवतः। अङ्ग-वङ्ग-कलिङ्ग-तिलङ्ग-काश्मीर-कर्णाट-विदर्भ-वैराट-भृगुकच्छ-सौराष्ट्र-लाट-धाट-कन्यकुब्जादिदेशाधिपाः समाहूताः, सर्वेपि भूपाः समागताः, स्वयंवरमण्डपे यथायोगं सिंहासने उपविष्टा राजकुमाराः, दमयंती अपि शिबिकायां उपविश्य, धात्रीसंयुता मण्डपे आगत्य, यत्र निषधपुत्रो नलकुमार उपविष्टः तत्रागत्यादर्शबिम्बे तद्रूपं निरीक्ष्य, नलकण्ठे वरमाला स्थापिता। तदा महामहेन परिणायितः।

ततो निषधपुत्रो नववधूपरिवृतः निजगृहगमनार्थं मार्गे प्रस्थितः। मार्गे गच्छति सति अटवी प्राप्ता, तदा सूर्योऽस्तं गतः अन्धकारः प्रसृतः, मार्गशुद्धिः दुर्निरीक्ष्या जाता, अग्रे भ्रमरशब्दान्यश्रुणोत्, न ज्ञायते अंधकारेण किं सरो विद्यते? अथवा अन्यत् किमपि

जलस्थानकं विद्यते? ईदृशो दिग्मूढो जातः समस्तनलपरिकरः । तदवसरे दमयंत्या स्वीयभालस्थले हस्तः स्पृष्टः परिवर्तितश्च, तत्कालं प्रदीपवत् उद्योतोऽभूत्, ततः सर्वे जनाः हृष्टा, अग्रे कार्योत्सर्गे स्थित एकसाधुः दृष्टः, ततः साधोः शरीरेण सार्धं मदोन्मत्तहस्ती शुण्डादण्डेन संघर्षणं कुरुते, ततो गजमदः शरीरे लग्नः, तस्य गन्धेन भ्रमराः रणझणत्कारं कुर्वन्ति स्म, ईदृग् साधोः स्वरूपं दृष्ट्वा निषधादयः सर्वे जनाः, तत्समीपे गत्वा ववन्दिरे, साधुरपि कायोत्सर्गं मुक्त्वा, भूपादिभ्यो धर्ममुपदिष्टः।

तदा निषधराजा एवं प्रपच्छ-अहो स्वामिन्। दमयन्त्या भालस्थलादुद्योतः कथं प्रादुर्भूतः? तदा मुनीश्वरेण प्रोक्तं-भो राजेन्द्र! श्रुणु दमयन्तीचरित्रं। अनया दमयन्त्या, पूर्वभवे पञ्चशत्याचाम्लानि कृतानि। पुनः श्रीशान्तिनाथस्य पूजा कृताऽभूत्, तपःसमाप्तिर्जाता उद्यापनं कृतं विधिपूर्वकम्। चतुर्विंशतिजिनभालस्थले रत्नजडितानि स्वर्णमयानि बहुमूल्यानि तिलकानि कारयित्वा समारोपितानि, तत्पुण्यप्रभावादिहभवे भीमपुत्रीभालस्थले उद्योतो जातः। ईदृशं ज्ञानीगुरुवचनमाकर्ण्य, निषधराजा हृष्टः, ततः साधुभगवन्तमभिवन्द्य निषधनृपः सपरिकरोऽनुक्रमेण निजनगरे स्वगृहे समागतः।

अथ दमयंती नित्यं श्रीतीर्थकराऽर्चां शुद्धमनसा चकार, एवं परमात्मबिम्बं पूजयति, आगामि भवसंबन्धिपुण्यमुपार्ज्य, कालमासे कालं कृत्वा, द्वारिकायां वसुदेवप्रिया कनकवती नाम्नी जाता, जैनधर्मे परमरक्ता सांसारिकसुखमनुभुञ्जन्ती विचरति स्म। तदवसरे श्रीनेमिनाथः समवसृतः। कृष्णवासुदेवः सर्वद्ध्र्या वन्दितुमागतः, भगवद्भिर्धर्मः कथितः, देशनान्ते कृष्णेन पृष्टं, हे स्वामिन्! एषा द्वारिकानगरी, अक्षया किं वा क्षया भविष्यति, तदा स्वामिना प्रोक्तं- हे कृष्ण! अस्या द्वारिकानगर्या द्वैपायनऋषितो विनाशो भविष्यति, ईदृशं श्रीनेमिपार्श्वे द्वारिकादाहं श्रुत्वा, बहवो यादवकुमाराः तथा यादववंशनार्यः प्रव्रज्यां जगृहुः तदा वसुदेवस्य भार्या द्विसप्ततिसहस्रसङ्ख्यकास्ता अपि प्रभुपार्श्वे दीक्षां प्रपेदिरे। ततः कनकवती गृहे स्थिता सती परमभावनां भावयन्ती शुक्लध्यानं ध्यात्वा, केवलज्ञानं प्राप्ता। देवदत्तमुनिवेषं लात्वा, कर्मक्षयं कृत्वा, मुक्तिं गता।

**इति श्री दमयन्ती कथा एकविंशतितमी ।।२१।।**

---

**❊ स्वयंभुवे चन्दनचर्चिताय, सुनीलकण्ठाय हृदि स्थिताय,**

**युगादिकर्त्रे परमात्मने च, नमोनमः श्री ऋषभेश्वराय ।।१।।**

**दृढचित्तेन कर्णेन, महीनाथेन सन्ततम्।**

**कुर्वाणेनार्हतां पूजामर्जिताः शिवसम्पदः।।२।।**

**अस्यार्थः**- यः पुरुषः दृढचित्तेन स्थिरमनसा श्रीजिनेश्वरस्य सपर्यां सततं विधत्ते, स पुरूषः सम्पदमुपार्जयते, कर्णनृपवत्। अत्र तत्सम्बन्धो व्याख्यायते।

जम्बूद्वीपे भरतक्षेत्रे सूर्यवतीपूर्यां कर्णराजा राज्यं चकार।

तेनाऽन्यदा धर्मघोषाचार्यसमीपे श्रीजिनार्चाफलविषया धर्मदेशना श्रुता, यतः।

**स्वर्गस्तस्य गृहाङ्गणं, सहचरी साम्राज्यलक्ष्मीः शुभा,**

**सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि।**

**संसारः सुतरः शिवं, करतलक्रोडे लुठत्यञ्जसा,**

**यः श्रद्धाभरभाजनं, जिनपतेः, पूजां विधत्ते जनः ।। सिंदूर प्र.९०।।**

इत्यादि धर्मोपदेशं श्रुत्वा, जिनपूजाकरणार्थं एकाग्रचित्तः सन् आचार्यं प्रति एवमुवाच- अहो स्वामिन्! त्वत्साक्षिणा नियममहं करोमि, अद्यप्रभृति श्रीवीतरागदेवस्य पूजां विनाहमन्नं पानीयमपि मुखे न प्रक्षिपामि एतादृशमभिग्रहं गृहीत्वा, गृहे आगतः।

अथ कर्णराजा स्वगृहे परमरमणीयकं मनोहरं चैत्यं कारयित्वा, मध्ये श्री पार्श्वनाथबिम्बं स्थापयित्वा, बहुभक्त्या निरन्तरं अर्चयामास। यथा देवलोके सुरेन्द्रः सिद्धालयस्थां जिनप्रतिमां पूजयति, तथा शुभद्रव्येण कर्णोऽपि जिनमर्चति। ईदशीं पूजां पृथिव्यामन्यः कोपि जनः कर्तुं न क्षमः।

अथैकदा प्रस्तावे इन्द्रसभामध्ये इन्द्रेण कर्णभूपस्य प्रसंशा कृता, यत् मर्त्यलोके भगवतोऽर्चायां कर्णराजा अत्यन्तरक्तोस्ति, प्रत्यहं पूजां विना अशनादि न विदधाति। ईदृक् सुरेन्द्रवचनमश्रद्दधान एको देवः परीक्षाकरणार्थं, मर्त्यलोके समागत्य, पूजावसरे श्री कर्णनृपकृतचैत्यमध्यात् प्रभुमूर्तिरपहृता, यावत् स्नानं कृत्वा पूजां कर्त्तुं देवगृहे समागतो भूपः, तावत् गर्भागारे प्रतिमा न निरीक्षिता, तदा राजा दुर्मना जातः, तत्रैव स्थितः मुखेऽन्नपानं न क्षिपति एवं यावद् दिनत्रयं जातम्, तदा स देवो भूपस्य जिनपूजायां एकाग्रचित्तं निरीक्ष्य तत्र प्रकटीभूयैवमकथयत् - अहो कर्ण! तव जिनभक्तिरागं निरीक्ष्याहं तुष्टोस्मि, वरं वृणीष्व, तदा कर्णेन प्रोक्तं - मदीयां जिनप्रतिमां देहि, सुप्रसन्नीभूय देवेन प्रतिमा दत्ता। पुनर्हेममयं रत्नजडितं कुण्डलयुग्मं दत्तम्, पुनरीदृशो वरो दत्तः। यत्-

प्रत्यहं सपादभारं काञ्चनदानं त्वं देहि, तव भाण्डागारे अक्षयनिधि र्भविष्यति, एवं

वरद्वयं दत्वा, देवः स्वस्थाने गतः। अथ कर्णराजा प्रभुभक्तितः कल्याणकरं पुण्यमुपार्ज्य नित्यं सुवर्णदानतः यशः समुपार्ज्य, प्रान्ते सद्गतिं प्राप्तः ।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां जिनेश्वरस्य सपर्याकरणे कर्णनृपकथा द्वाविंशतितमी ।।२२।।**

---

**✻ अनेकविद्याधरसाधुकोटी, यत्रैव भूमिस्थतपोधनानाम्।**

**बह्वी च कोटी शिवऋद्धिमाप्ता , तं सिद्धशैलं च महेम नित्यम् ।।१।।**

**✻ फलानि क्रमुकादीनि, ढौकयन् शुभभावतः।**

**स वर्धमानामाप्नोति जनः कौलिकवत् श्रियं।।२।।**

**अस्यार्थः**-यो भव्यजीवः श्रीजिनबिम्बाग्रे श्रीफलक्रमुकरम्भाफलादीनि शुभभावात् ढौकयति, स भव्यो वर्धमानां श्रियं प्राप्नोति कौलिकवत्। अत्र तद्वृत्तं लिपीक्रियते- जम्बूद्वीपे भरतक्षेत्रे मीनपुरनगरे, आजन्मतो दरिद्री पद्मनामा वणिक् वसति। तत्पत्नी पद्मावती वर्तते, दम्पत्योर्वृद्धत्वे पुत्रः समागतः। वीर इति नाम दत्तम्। तद्बालकस्य जन्मदिवसात् पदम्गृहे लक्ष्मीवृद्धिमती जायते, अनुक्रमेणाष्टकोटीसुवर्णमुद्रा भाण्डागारे जाता, तद्बालकस्य पुण्यप्रभावात्। अथाऽन्यदा पुरपरिसरे केवलीभगवान् समवसृतः। पद्मवणिक् वन्दनार्थं गतः। धर्मदेशनां श्रुत्वा, एवं पप्रच्छ-अहो भगवन्! मद्गृहे पूर्वं लक्ष्मी नाभूत्, परमस्य बालकस्य जन्मानन्तरं, लक्ष्मी वृद्धिमती जाता। तत्कथं? एतत् वाक्यं श्रुत्वा, केवलिना प्रोक्तं-भो! श्रेष्ठिन्! श्रुणु, त्वत्पुत्रस्य पूर्वभव वृत्तान्तम्-

धुरापुरी नगरे त्वत्पुत्रजीवो वरनामा कौलिकोऽभूत्, कदाचिदरण्ये परिभ्रमता, कौलिकेन साधवो दृष्टाः, तत् समीपे

**देवपूजा, गुरूपास्तिस्, तीर्थयात्रा जपस्तपः**

**दानं चेति गृहस्थानां, षट्कर्माणि दिने दिने।। ।।**

इत्यादि धर्मवचनं श्रुत्वा वरकौलिकेन ईदृशोऽभिग्रहो गृहीतः । अहं जिनबिम्बाग्रे फलमवश्यं ढौकयिष्यामि । एवमभिग्रहं गृहीत्वा, निजगृहे गतः, पश्चात् कौलिकेनाष्टदिनं यावदष्टौ फलानि ढौकितानि, ततो मृत्वा पुण्यप्रभावात् तव पुत्रो जातः। पूर्वभवेऽष्टभिः फलैः प्रभुः पूजितः, तेनाष्टकोटिः सुवर्णमुद्रा प्राप्ता। एवंविधां मुनिवाणीमाकर्ण्य पद्मश्रेष्ठी वीरकुमारश्च जिनपूजाविषये सावधानीभूतौ, सप्तक्षेत्र्यां धनं वपन्तौ, प्रान्ते दीक्षां गृहीत्वा, मोक्षं जग्मतुः।

**इति श्रीफलविषये कौलिककथा त्रयोविंशतितमी समाप्ता ।।२३।।**

**✻ अनेकं सदेकं स्वरूपं त्वरूपं, त्वनित्यं च नित्यं महत्वं तनुत्वम्।**

**अदीर्घं च दीर्घं गुरुत्वं लघुत्वं, त्वदीयं स्वरूपं सदा चिन्तयामि।।१।।**

**✻ जिनेन्द्रार्चां वितन्वानः, कुसुमैः सुष्ठुगन्धिभिः।**

**लभते कमलां मर्त्यश्चन्द्रमात्सिकवद् वराम्।।२।।**

**अस्यार्थः-** यो मर्त्यः सुगन्धपुष्पैः जिनेन्द्रार्चां वितनोति, स मनुष्यः वरां प्रधानां कमलां लक्ष्मीं लभते चन्द्रमात्सिकवत्, अत्र तत्कथा कथ्यते।

पुष्पकेतुनगरे कुसुमकेतुराजा राज्यं चक्रे, न्यायरीत्या प्रजां पालयामास। महाधन-सम्पतिवान् महाप्रतापवान् त्यागवान् राजाऽस्ति। एकदा श्रीधर्मसेनाऽचार्यपार्श्वे धर्मदेशनां श्रुत्वा, ज्ञानिनं गुरुं मत्वा, राजा प्रपच्छ, अहो स्वामिन्। मया प्राग्भवे किं सुकृतं कृतं? यत्प्रभावादीदृशीं ऋद्धिं प्राप्तोस्मि। तर्हि गुरुणा प्रोक्तं-रमापुरीनगर्यां एकश्चन्द्रनामा [१]माच्छिकोऽभूत्, तेन कदाचिद् अवसरे साधुसमीपे जिनपूजाफलं जीवदयाफलं च श्रुत्वा गुरुपार्श्वेऽभिग्रहो गृहीतः। अहो पूज्या! अद्य प्रभृति, यावज्जीवमहं जीवहिंसां न कुर्यां, पुनः परमात्मपूजां यथाशक्त्या करिष्यामि। एवं नियमं लात्वा, चन्द्रधीवरः मात्स्यिकत्वं विहाय, निरवद्यामाजीविकां करोति। त्रसादिजीवान् न हिनस्ति, जिनेन्द्रार्चां करोति। अमुना प्रकारेण धर्मक्रियां अर्चन् (आचरन्) चन्द्रधीवरः कालं कृत्वा, प्रभुपूजाप्रभावात्, त्वं कुसुमकेतुनामा राजा जातः। अनर्गलऋद्धिं प्राप्तः, अस्मात् भवादष्टमे भवे त्वं मुक्तिं प्राप्स्यसि।

**इति श्रीस्नात्रपञ्चाशिकायां चन्द्रमात्सिककथा चतुर्विंशतितमी ।।२४।।**

---

**✻ अनन्तविज्ञानमतीतदोष-मबाध्यसिद्धान्तमर्त्यपूज्यम्।**

**श्रीआदिदेवं विमलाचलस्थं, त्रियोगशुद्ध्या तमहं महामि।।१।।**

**✻ कुर्वाणो मनुजो नित्यं, पूजां निश्चयपूर्वकम्।**

**मुकुन्दद्विजवत् स्वर्ग-मुक्त्यादिसुखभाग् भवेत्।।२।।**

**अस्यार्थः-**यो मनुष्यो निश्चयपूर्वकं जिनेश्वरस्य पूजां वितनोति, स मर्त्यः स्वर्ग - मुक्त्यादिसुखभाग् भवेत्, मुकुन्दब्राह्मणवत्। अत्र तच्चरित्रमभिधीयते ...

कामरूपनगरे कामध्वजनामा राजा राज्यं कुरुते स्म, (तेन) समस्तशत्रुगणो निर्जित्य

---

१. मत्स्य+इक=मात्स्यिक अथवा मात्सिक-आ संस्कृत शब्द उपरथी प्राकृतमां 'माच्छिक' एवुं ध्वनि परिवर्तन थयुं छे जे आगळ जतां गुजरातीमां 'माछी'=माछीमार-शब्द बन्यो। आवी कृतिओ के संस्कृतटीका ग्रन्थोमां आवा प्राकृतशब्दो आवता होय छे...एटले एने अशुद्ध न मानवा। -अमृत

वशीकृत:, अन्यदा समये मोहमर्दनसूरि: समवसृत:, तत्र नृपो गतो गुरुपार्श्वे धर्मोपदेश: श्रुत:। श्रुत्वा चैवं पृष्टवान् अहो गुरो! मया पूर्वभवे किं पुण्यं कृतं यत्प्रभावादीदृशीं ऋद्धिं प्राप्तोस्मि। तदा सूरीश्वरेण प्रोक्तं -प्राग्भवे कलाकेलिनगरे दरिद्री बुभुक्षित: मुकुन्दब्राह्मणस्त्वं अभू: । एकदा धनेश्वरसूरिपार्श्वे जिनार्चाया: फलं माहात्म्यं चैवं श्रुतं, (यद्) य: पुरुष: पूजां करोति, स: सौभाग्यं लभते, लोके सन्मान्यतां राज्यद्र्धिं प्राप्नोति, सुन्दराकारो भवति, आरोग्यं च सुरलोकसुखं अनुक्रमेण शिवं लप्स्यते(लभते)। एवंविधं मुनिराजवाक्यं श्रुत्वा मुकुन्दब्राह्मणेन पुष्पै: परमात्मपूजा विहिता, अथ स विप्र: पुण्यमुपार्ज्य, ततो मृत्वा स्वर्गलोके सुरोऽजनि। ततश्च्युत्वा त्वं कामध्वजनामा राजा जातोसि, पुनर्जिनभक्तितोऽग्रे सप्ताऽष्टभवं भवे भ्रान्त्वा, मोक्षं यास्यसि।

**इति श्री पूजाधिकारे मुकुन्दब्राह्मणस्य पंञ्चविंशतितमी कथा ।।२५।।**

---

**✻ सुवर्णवर्णं गजरा0**

**कुर्वन् जिनार्चां भावाज्जिनशेखरवत् स्फुटम्।**

**✻ परत्र लभते स्वर्गं सम्पदं भव्यमानव:।।१।।**

**अस्यार्थ:-**

यो मर्त्य:, श्री जिनेश्वरस्य सेवां भावात् वितनोति, स भव्यमानव: परत्र परभवे स्वर्ग सम्पदं लभते, जिनशेखरवत्, अत्र तत्प्रबन्धो लिख्यते-

कामरुपनगरे भीमनामा मातङ्ग:, परिवसति स्म, तत्पत्नीकुक्षौ गर्भोत्पन्न:, समये दन्तसहित: शिशुर्जात:, तद्वेलायामेव मातङ्गेन भयङ्करं बालकं ज्ञात्वा, वन-मध्ये मुक्त:, तदवसरे राजा क्रीडार्थं वने समागत:, भूपेन वनमध्ये क्रीडता महातेजस्वी बालो दृष्ट:, निरीक्ष्य प्रमुदित:, तं बालमादाय भूपो मन्दिरे समेत:।

स बालक: स्वपुत्रवत् पालित:, जयसेनकुमार इति नाम दत्तम्, अनुक्रमेण यौवनं प्राप्त:, राज्यधुरंधरयोग्यं मत्वा, राज्यं दत्वा, भूपो दीक्षां जग्राह, निरतिचारं चारित्रं पालयत: केवलज्ञानमुत्पन्नम्, तदा राजर्षि: केवलज्ञानेन सर्वभावान् जानाति, केवलदर्शनेन पश्यति, तन्मातङ्गमातङ्गीयुगलप्रतिबोधनार्थं, कामरूपनगरे समागत:, धर्मश्रवणार्थं राजा प्रजादय: [च] सर्वे समागता:, तन्मातङ्गयुगलं समागतम्, भगवता देशना दत्ता,

अथ जयसेनभूपं निरीक्ष्य तन्मातङ्गयुगलं जहर्ष, राजापि तं युग्मं निरीक्ष्य हर्षं प्राप।

अथ देशना श्रवणानन्तरं राजा प्रपच्छ-एतत् मातङ्गयुगलं दृष्ट्वा मच्चित्ते हर्षः समुत्पद्यते, मां दृष्ट्वा एतयोः हर्षः प्रपद्यते, तदत्र किं कारणं वर्तते? तर्हि मुनीश्वरेणोक्तम्-एतन्मातङ्ग-मातङ्गीयुगलं तव मातापितरौ स्तः, यदा दन्तसहितस्त्वं जातोसि, तदा मातृपितृभ्यां त्वं वनमध्ये मुक्तः, तत्राऽकस्मात् राजाऽऽयातः, त्वां सुरूपं दृष्ट्वा तत्काल प्रसूतं शिशुं निरीक्ष्य, गृहे आनीय पुत्रवत् रक्षितः, राज्यपदं दत्तं, पूर्वभवे त्वं समीपुरे जिनशेखरश्रावकोऽभूः, एकदा श्री जिनेश्वरस्य पूजां क्रियमाणेन त्वया, एकं पुष्पं भूमौ पतितं गृहीत्वा पुनरपि भगवच्छिरसि चटापितं, तदविधिदोषतः पूजायां दोषो लग्नः, तदालोचनं विना मृत्वा, त्वं मातङ्गीकुक्षौ समुत्पन्नः, प्रभुपूजायाः पुण्यतो राज्यं प्राप्तम्, ईदृशं साधुमुखात् श्रुत्वा उहापोहं कुर्वतः, जातिस्मरणं उत्पन्नम्, पूर्वभववृत्तं निरीक्ष्य, संसाराद् विरक्तो जातः, गुरुपार्श्वे दीक्षां गृहीत्वा, तदाऽऽशातनादोषमालोच्य, शुद्धचारित्रं प्रपाल्य, स्वर्गलोके सुरोऽभूत्, ततश्च्युत्वानुक्रमेण मोक्षं प्राप्स्यति।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां पूजाधिकारे मातङ्गकथा षड्विंशतितमी ।।२६।।**

---

**✻ [१]जो जोइंद-णरिंदवंदितपदो, तेलुक्कचिंतामणी,**
**जं आलिंगदि रागसंगदिमदी सा मुत्तिलीलावदी।**
**जादा णिव्वुदिदा वियागदमला विज्जापसूदी जदो,**
**सो सामी रिसहो जिणं(णिं)दवसहो दिज्जा सुविज्ञासुहं ।।१।।**

**✻ स्वकीयैः कुसुमैः शश्वद्, भावात् तीर्थकरार्चनाम्।**
**कुर्वाणो मनुजो लक्ष्मीभाग् भवेन्माल्यकारवत्।।२।।**

**अस्यार्थः-** यो भव्यजीवः स्वकीयैः कुसुमैः निरन्तरं शुभभावेन श्रीतीर्थकरस्य पूजां कुरुते, स मनुजः लक्ष्मीभाग् भवेत्। मालाकारवत्।। अत्र तत्कथा प्रतिपाद्यते-

श्रीपुरनगरे एको वीरनामा मालाकारो वसति, तस्य वीरानाम्नी भार्या, सा भद्रक - परिणामा सदा निजपुष्पवाटिकातः पुष्पाण्यानीय, आजीविकार्थं विक्रीणाति। पुनः पुण्यार्थं श्रीजिनप्रासादे अर्हद्बिम्बस्यापि पुष्पैः पूजां करोति।

अथैकदा स्वकीयभर्त्रे तया प्रोक्तं-अहो स्वामिन्! यथा एतावन्तः श्रावका अनेकद्रव्यं व्ययीकृत्य केशरचन्दनादिभिः तीर्थंकरं पूजयन्ति, तथा त्वमपि निजपुष्पैः पूजां

१. शौरसेनीप्राकृतभाषानिबद्धमिदं शार्दूलविक्रीडितच्छन्दोबद्धं पद्यं विद्यते-अमृत।

कुरु, यथा सुखी भवेत्, तदा, मालाकारेण प्रोक्तं -अरे मुग्धे! लक्ष्मी: सुखेन न मिलति, महता कष्टेन लक्ष्मीरायाति, पुष्पपूजां तदा कुर्यां, यदि कष्टं विना कुसुमानि उत्पद्यन्ते। ईदृशानि निद्धं(निर्ध्वं)सपरिणामोत्पन्नानि वाक्यानि मालिकेन प्रोक्तानि, तान्याकर्ण्य मालिकस्त्री: विशेषत: परमात्मपूजायां दृढचित्ता जाता। सदैव पूष्पपूजां रचयति।

अथ कालमासे कालं कृत्वा, सा मालिकनारी पुष्पसेवापुण्येन, मृत्वा चन्द्रपुरीनगर्याम् चन्द्रमहीपतिराज्ञी अभूत्, कमलानाम्नी। तत्रापि परमात्मार्चां शुभभावेन विदधाति, अन्यदा गवाक्षस्थिता कमला राज्ञी नगरं विलोकयति, तदवसरे गृहे भिक्षार्थं अटन्तं भयङ्करं कुरूपं बुद्धिहीनं बुभुक्षितं प्राग्भवभर्त्तारं वीक्ष्य, उहापोहं कुर्वन्त्या राज्ञ्या जातिस्मरणं जातं, तदा तया एवं प्रोक्तम्, अहो वीर! मया श्रीजिनेश्वरार्चोद्यमे त्वं प्रेरीतोऽभू:, तथापि त्वया प्रभुपूजा नो विहिता, तेन च दु:खावस्थेदृशी दृश्यते, एतद्वचनमाकर्ण्य वीरमालिकेनाऽवसितं किमेषा पूर्वभवस्त्री मम विद्यते? जिनपूजाप्रभावाद् भवान्तरे सुखिता जाता, अस्या वाक्यं मया चित्ते न धृतं, तेन दु:खी जातोऽहम्, एवंविधं शोकं कृत्वा, ग्राम्यजनाग्रे रोदनं करोति स मालिक:। यदा रोदनकारणं लोकै: पृष्टं, तदा स्वीयं चरित्रं स्त्रीवृतम् च सर्वं निगदितं, तत: पूजाया: प्रत्यक्षफलं ज्ञात्वा, वीरमालिकोऽपि बहुभावात् परमात्मपूजां कुसुमै: विधत्ते, पुन: कमला राज्ञी बहुभक्त्या विधिपूर्वकं [पूजां] वितनोति, एवं परमेश्वरपूजात: षट्भवं यावत् मनुष्यसुखं भुक्त्वा, प्रान्ते संयममादाय मोक्षं गमिष्यत: मालिक-मालाकारिके।

**इति श्री सम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां पुष्पपूजायां मालिक-मालिकाकथा सप्तविंशतितमी ।।२७।।**

---

*** स्वस्ति श्रीमरुदेवीनन्दनमानन्दकन्दघनपटलम्।**

**शत्रुञ्जयगिरिभूपं, सदैव वंदामि[1] शुभभावात्।।१।।**

*** जिनाधीशं सदा भक्त्या, कुसुमैः प्रचुरैर्मुदा।**

**यजते यो जनः सः स्यात्, सुखी मुकुन्दविप्रवत् ।।२।।**

**अस्यार्थ** :-यो मानव: सदा भक्तितो जिनेश्वरं प्रचुरै: पुष्पै: यजते पूजते, स मर्त्य: सुखी भवेत् तन्मध्ये चित्रं किं? परं स्तोकै: कुसुमैरपि परमात्मानमर्चयति स नरो बहुद्रव्यं सुखसंपदा [दं] च लभेत मुकुन्दविप्रवत्। अत्र तत्कथा अक्षरेण विन्यस्यते ।

---

१. वन्दे इति सुष्ठु प्रयोग:, 'वन्देऽतिशुभ' इति कार्यम्।

भीमपुरीनगरे विधुनामा श्रेष्ठी वसति स्म। एकदा श्रीपर्युषणपर्वणि समागतेऽर्हच्चैत्ये तेन महती पूजा कृता। तन्नगरनिवासिनो बहवो जनाः वन्दनार्थं प्रेक्षणार्थं च तत्रागताः। तत्रैको विप्रः प्रभुपूजावीक्षणार्थमागतः, उत्कृष्टां पूजां निरीक्ष्य, विप्रोऽचिन्तयत्-अहो एते धन्या! व्यवहारिणो धनाढ्याः, ये जिनेश्वरस्यैवंविधां सेवां, बहुमानतः कुर्वन्ति, यद्यहं धनी भवेयम् तदाऽहमपीदृशीं सेवां भक्तितः कुर्वे, एवं स्वीयामनाथतां विभाव्य, निजजीर्णवस्त्रप्रान्ते त्रिकपर्दिकाः दृष्टाः, तासां षट् पुष्पाण्यादाय, मालां रचयित्वा भगवत्कण्ठे समारोपिता, तत्पुण्यप्राग्भारतस्तद्भवाच्च्युत्वा हीरपुरे वज्रसेनराज्ञः पट्टराज्ञीकुक्षावततार, समये जन्माऽभवत्, हीरकुमार इति नाम प्रदत्तम्। शिक्षिताः सकलाः कलाः, यौवनावस्थावसरे पित्रा राज्यपदं दत्तं, विप्रजीवो हीरनामा राजा जातः, षट्सहस्राण्यश्वाः, षट्लक्षाणि पदातिसेना, ईदृशीं राज्यद्र्धिं प्राप्य, तत्रापि जगत्परमेश्वरस्यार्चां विधाय, बहुपुण्यमुपार्ज्य प्रान्ते सद्गतिं गतः।

**इति श्री स्नात्रपञ्चाशिकायां पुष्पपूजाविषये मुकुन्दद्विजकथाऽष्टाविंशतितमी ।।२८।।**

---

**❊ चिदानन्दलीलारसास्वादमग्नं, सदैवात्मतत्वे मनो यस्य लग्नम् ।**

**अशेषाद् विभावान्मनो यस्य भग्नं, भजेयं युगादीशदेवं सदाहम्।।१।।**

**❊ धनाभावे जनो भाव-पूजानर्त्तनगायनैः ।**

**करोति मानवः सम्यग्, लभते वाञ्छितं धनम् ।।२।।**

**अस्यार्थः**-यस्य पुरुषस्य धनाभावेऽन्यत्पूजायाः कारणं न भवेत्, तथापि जिनप्रतिमाग्रे नर्तते [नृत्यति] गीतानि गायति, तथापि बहुलपुण्यमुपार्ज्यते, भवान्तरे शिवसौख्यं लभ[भ्य]ते। धनवणिक्वत्, अत्र तत्कथा लिख्यते-

अयोध्यानगर्यां निर्धनो धननामा वणिक् परिवसति, स निरन्तरं परमात्मचैत्ये वन्दनार्थं गच्छति, तदा सप्तदशभिन्नां पूजां निरीक्ष्य, चित्ते एवमचिन्तयत्-अहो एते धनवन्तो धन्याः कृतपुण्या व्यवहारिणः, ये स्वीयं द्रव्यं श्री जिनेश्वरसेवायां व्ययीकुर्वन्ति, मत्पार्श्वे धनं नास्ति, तदाहं कथं सेवां करोमि? एवं मनसि ध्यात्वैकदा साधुसमीपे देशनेदृशी श्रुता -

**सयं पमज्जणे पुन्नं, सहस्सं च विलेवणे।**

**सयसाहस्सिया माला, अनन्तं गीयवाईए।।**

एनां गाथां श्रुत्वा, धनवणिक् भगवतोऽग्रे नृत्यं चकार, तन्नृत्यपूजाप्रभावात् मृत्वा चक्रवर्तिऋद्धिं प्राप्याऽनुक्रमेण चक्रवर्तिऋद्धिं त्यक्त्वा, दीक्षामादाय, मोक्षं गतः।

**इति श्रीसम्यक्त्वदीपिकायां स्नात्रपञ्चाशिकायां धनवणिक्कथा एकोनत्रिंशत्तमी समाप्ता ।।२९।।**

---

**✻ तावुब्भिन्नसुवन्नवन्नजुइले यस्संऽसदेशे जडा,**
**पंदीला यदि इंदनीलफलिणी तापिच्छगुच्छज्जुदी।**
**लम्मा कप्पलदा यधा सुलगिलि स्कंधम्मि तुंगे स्तिदा,**
**शेपष्का लहुणाभिलायतणए मे मव्वयं बालयं ।। १।।**

**✻ एकेनापि सुमेनैव यः पूजां कुरुतेऽर्हतः।**
**स एव लभते राज्यं स्वर्णकार इव क्षणात् ।।२।।**

**अस्यार्थः**-यो मर्त्य एकेनापि पुष्पेण अर्हत्पूजां कुरुते, स मर्त्यो राज्यं लभते, स्वर्णकारवत्, अत्र तद्वृत्तं लिपीक्रियते,

वाणारसीनगरे जितारी राजा राज्यं करोति, स जैनधर्मको (जैनधार्मिको) नित्यं परमात्मपूजां करोति, एकदा समये भूपो विशेषतो जिनपूजां कुर्वन् निर्धनस्वर्णकारेण दृष्टः, निरीक्ष्य मनसि एवमचिंतयत्-अहो मया पूर्वभवे परमात्मार्चा न कृता, तेन दरिद्री इहभवे जातोऽस्मि, द्रव्यं विना कथं पूजयितुं शक्नोमि, एवं पश्चातापं कृत्वा, मालिकपार्श्वतः एकं कुसुममादाय, प्रभुः पूजितः। एवमष्टदिनं यावत् एकैकेन पुष्पेण पूजा विहिता, तदनन्तरं मृत्वा, तत्रैव जितारिभूपस्य राज्ञ्युदरे तनयत्वेनावतीर्णः, नव(मे) मासे प्रसूतः, स्वर्णकुमार इति नाम दत्तम्, यौवनसमये राज्यं प्राप्तं, न्यायेन राज्यं कुरुते स्म, स स्वर्णराज्ञा एकदा निजमन्दिरगवाक्षे उपविष्टः सन्, नगरं विलोकयन् पूर्वभवात्मीयतृणकुटी निरीक्षिता, समीक्ष्योहापोहं कुर्वतः सतो भूपस्य जातिस्मरणं समुत्पन्नम्। तदा पर्षज्जनाग्रे इमं श्लोकमचीकथत्, यतः-

प्राग्भवीयमिदं गेहं, जीर्णतृणमयं मम।
विमानसदृशं ह्येतत् गृहं चास्मिन् भवे वरम्।।१।।

अहो पूर्वभवे तृणमयं मद्गृहं अभूत्, अधुनाऽस्मिन् भवे सुरविमानसदृशं मन्दिरं प्राप्तम् तत् श्रीजिनपूजाप्रभावतः, तदनन्तरं सर्वे जनाः पूजाफलं वीक्ष्यार्चां कर्तुं विशेषेणोद्यताः, राजापि सप्तदशभेदै र्भिन्नां (पूजां) नित्यं चकार, एवं बहुवर्षं परमात्मार्चां विधाय, प्रान्ते दीक्षां गृहीत्वा, समूलकाषं कर्मक्षयं कृत्वा, शिवं गतः।

**इति स्नात्रपञ्चाशिकायां स्वर्णकारकथा त्रिंशत्तमी समाप्ता ।।३०।।**

✻ **आनन्दकन्दोद्भवनैकमेघं, स्वीयात्मधर्मादिगुणैकगेहम्।**

**क्षमाधरं श्रीऋषभं जिनेशं, शत्रुञ्जयाधीशमहं महामि ।।१।।**

✻ **स्तोकैरेव सुमैस्तीर्थंकरपूजां जनः सृजन्।**

**भूपति र्जायते सद्यः, कुमारपालभूपवत् ।।२।।**

**अस्यार्थः**-यो भव्यः अल्पकुसुमैरपि जिनार्चां विदधाति, स मनुष्यः महाराजपदवीं लभते कुमारपाल भूपवत्, अत्र तच्चरित्रं लेशतः कथ्यते-

लक्ष्मीपुरनगरे धनवान् इभ्य आढरनामा वसति परमधार्मिकः, शुद्धश्रद्धानधर-जैनदर्शनरागिणस्तस्य गृहे किंनरनामा एकः किङ्करोऽस्ति, एकदा श्रेष्ठी श्रीजिनसपर्यां कुरुते, तदा किंनरः धूपकरणार्थं अग्निमादायागतः परमेश्वरार्चां कुर्वन्तं श्रेष्ठिनं वीक्ष्य, किंनरः किङ्कर एवं भावयति 'अहो मया प्राग्भवे प्रभुर्नेहितस्तेनेह जन्मनि दासत्वं प्राप्तोस्मि। अधुना यद्यहं प्रभुपूजां कुर्यां, तदा भवान्तरे सुखी स्यां, एवं ध्यात्वा, पञ्चकपर्दिकानामष्टादश पुष्पाण्यादाय, बहुभावेन जिनेश्वरस्य पूजा विहिता, तदा स किङ्करः पुण्यमुपार्जितवान्, ततो मृत्वा निर्मलविपुले चौलुक्यवंशे सः किंनरः दासः समुत्पन्नः, अनुक्रमेण कुमारपालनामा राजा जातः, तत्कथानकं कुमारपालचरित्रादवसेयम्। अत्र तु जिनपूजा फलतो राज्यं प्राप्तं इति ज्ञापनार्थं पूर्वभवः प्रोक्तः, इयती सेना लब्धा, एकदशाश्वलक्षाणि, गजेन्द्राणां शतानि च, पत्तिकोट्यो द्वादश स्युः, रथा, पंचायुतीमिता इत्यादि..।

**इति श्री स्नात्रपञ्चाशिकायां कुमारपालभूपकथा एकत्रिंशत्तमी समाप्ता ।।३१।।**

---

✻ **अष्टापदाभं वरदेहयष्टिं, स्वरूपकान्तिं कमनीयनेत्रम्।**

**अनेकवृन्दारकवन्द्यपादं, नित्यं भजेयं ऋषभाख्यदेवम्।। ...।।**

✻ **स्वसंपत्त्यनुसारेण, पूजां [१]कृत्वा जिनेशितुः।**

**लभन्ते भूरि कमलां, मनुजा सूत्रधारवत्।।...।।**

**अस्यार्थः**-ये मनुजाः स्वसंपदनुसारेण जिनेशस्य पूजां कुर्वते, ते नराः बहुलाः लक्ष्मी र्लभन्ते, सूत्रधारकवत्। अत्र तत्सम्बन्धः प्रतिपाद्यते

१. हस्तप्रतमध्ये 'कुर्वन्' पाठ-आसीत्, किंतु श्लोकोत्तरार्धे 'लभन्ते मनुजाः' इति बहुवचनस्य ''कुर्वन्पदेनान्वयो न शक्यः, अपरं च वृत्तौ बहुवचनप्रयोगं दृष्ट्वा 'कृत्वा' इति वचननिरपेक्षत्वप्रधानः प्रयोगोऽस्माभिः कृतः-अमृत।

सूर्यपुरनगरे श्यामदेव इति नाम्ना राजा राजते, निखिलभूपतिसेवितपत्कजः। अथान्यदा तन्नगराद् बहिरेकः सिद्धविद्यो योगीश्वर आगतः। सोऽवधूतः एकं द्वात्रिंश-ल्लक्षणलक्षितगात्रं पुरुषम् आनाय्य, स्वर्णपुरुषं [-षकरणायाग्नौ] प्रक्षिपेत्, तावद् वनदेवता तत्रागत्य, तं योगीन्द्रं समुत्पाट्य कुण्डे प्रक्षिप्तस्तत्कालं स्वर्णपुरुषः सिद्धोऽभूत्, तद्वनदेवेन राजाग्रे व्यतिकरः प्रोक्तः, भूप! त्वं वनमध्ये गच्छ काञ्चनपुरुषं ममाज्ञया त्वं गृहाण, तव पुण्योदयात् प्रादुर्भूतः एवं श्रुत्वा तत्र गत्वा भूपः स्वर्णपुरुषं गृहीत्वा, स्वगृहे समागतः, अथ प्रतिदिनं तत्सुवर्णपुरुषस्योपाङ्गानि विभित्वा [विभिद्य], स्वर्णमर्थिजनेभ्यो राजा ददौ पुण्यार्थं, अन्यदा ज्ञानी गुरुस्तत्रागतः, भूपेन पृष्टं 'अहो! पूज्य! केन पुण्योदयेनाहं स्वर्णपुरूषं प्राप्तोस्मि? तदा ज्ञानिना निगदितं पूर्वभवेऽस्मिन्नेव नगरे भीमनामा सूत्रधारस्त्वमभूः, तेन गुरुपार्श्वे श्रुतं (यत्) तीर्थकरार्चनया सुखी भवेत् प्राणी मुक्तिसुखञ्च प्राप्नुयात्, यत उक्तम्

*** यः पुष्पैर्जिनमर्चति, स्मितसुरस्त्रीलोचनैः सोऽर्च्यते,**

**यस्तं वन्दत एकशस् त्रिजगता, सोर्हनिशं वन्द्यते।**

**यस्तं स्तौति परत्र वृत्रदमनस्तोमेन स स्तूयते,**

**यस्तं ध्यायति क्लृप्तकर्मनिधनः, स ध्यायते योगिभिः (सिन्दूर...-१२)**

इत्यर्हदर्चाफलं श्रुत्वा, ससूत्रधारः प्रधानानि पुष्पाण्यादाय, भगवदर्चां विधत्ते, एवं बहुदिनं यावदर्चां विधाय, ततो विपद्य हे राजन्! त्वया भूपपदं प्राप्तं, स्वर्णपुरुषो लब्धश्च, एतत् सर्वं जिनार्चाफलम्, एवं निशम्य भूपेन स्वर्णमयं नवीनं अर्हच्चैत्यं कारापितं, परमात्मबिम्बं विधाप्य, प्रतिष्ठाप्य च गर्भगृहे स्थापितः महामहेन, भूमीशो नित्यं प्रभुं पूजयामास, पूजां कुर्वन्नेवान्यदा शुभाध्यवसायः समागतः, तत्कालमेव केवलज्ञानं प्राप नरेन्द्रः, ततो देवतादत्तं वेषमादाय, अवनितले विहृत्वा (विहृत्या) ऽ नेकान् भव्य जीवान् प्रतिबोध्य मुक्तिं गतः।

**इति श्री स्नात्र पञ्चाशिकायां भीमसूत्रधारकथा द्वात्रिंशत्तमी ।।३२।।**

श्री

# निःश्रेयसम्

षाणमासिकपत्रम्

६

खण्ड – २

यशो –

प्रज्ञादर्शनम्

# परमज्योतिःपञ्चविंशतिका

**- मूलकाराः महोपाध्यायश्रीयशोविजयपादाः**

**- *वार्त्तिककाराः आचार्यकल्याणबोधिसूरिः**

इह हि परमकारुणिकाः कृतिकाराः परमज्योतिःप्रादुर्भावमन्तरेण विश्वविश्वव्याप्त-सन्तमससम्भेदासम्भवं सम्प्रेक्ष्य तत्प्रादुर्भावानुगुणप्रगुणोपदेशमारभमाणा आदौ परममङ्गलविधित्सया तदेव ज्योतिःस्तुतिगोचरीकुर्वते-

**ऐन्द्रं तत् परमं ज्योति-रुपाधिरहितं स्तुमः।**

**उदिते स्युर्यदंशेऽपि, सन्निधौ निधयो नव ॥१॥**

ऐमिति श्रीसारस्वतमन्त्रबीजपदम्, प्रस्तुतकृतिकारस्य कृतिलक्ष्म च। किञ्चेदं कृतज्ञताचिह्नमपि, गङ्गातटे कृतिकारकृतश्रीसरस्वतीदेवीसमाराधनेन सप्रसादया देव्या वितरितेन वरेण सम्प्राप्तपरमानुग्रहैः कृतिकारैर्नैकशतशास्त्रनिर्माणसामर्थ्यमधिगतमिति अविस्मरणीयः खलु लघुरप्युपकारः, किम्पुनरीदृश इति भावनीयम्।

उपाधिरहितं हि भवति परमज्योतिः, तत्साचिव्ये ज्योतिर्मात्रे पर्यवसानात्, सूर्यादिषु तथेक्षणात्। न च निरभ्रे सूर्यादौ तद्भावोऽनपाय इति वाच्यम्, तत्रापि ग्रहणादिगोचरे पारम्यविरहसद्भावात्। एवं भूमिगृहाप्रकाशनाद्यपि बोध्यम्। सापायः ससीम चैव भवति बाह्यप्रकाशः, तदितरश्च तदितरः, निरुपाधित्वादित्यत्र निष्कर्षः।

तदस्य ज्योतिषोंऽशेऽप्युदितेऽन्तः स्पष्टतरं संवेद्यते परमानन्दः, सोऽयं तत्त्वतो नवनिध्यतिशायी विभवः, परमार्थनिधिभूतत्वात्, निधीयतेऽनेनाऽऽत्मा सुखोदधौ-इति व्युत्पत्तिव्यालिङ्गितत्वात्। तथा च परमार्थत उपमामात्रं नवनिधिसान्निध्याभिधानमिति निपुणं निभालनीयम्। (क्रमशः-)

---

* पू.आ.श्री भुवनभानुसूरिसाम्राज्यवर्त्ती।

# शुभानुबन्धनम्...

- *आ.श्री कल्याणबोधिसूरिः

**द्वयमिह शुभानुबन्धं शक्यारम्भश्च शुद्धपक्षश्च।**

**अहितो विपर्ययः पुन-रित्यनुभवसङ्गतः पन्थाः ।।**

शक्यारम्भः स उक्तोऽत्र, रत्नत्रयक्रियागणे ।
यथाशक्ति नियोगो यो, मनोवाक्कायसङ्गतः ।।१।।
शक्येऽपि सदनुष्ठाने, यस्याऽऽरम्भो न विद्यते ।
स तिरस्कुरुते योगं, दुर्लभञ्च करोति तम् ।।२।।
न्यक्कृतो हि यतो योगः, प्रेत्यापि दुर्लभो भवेत्।
योगन्यक्कारसम्बद्ध-क्लिष्टकर्मविपाकतः ।।३।।
यो भावप्रतिबन्धस्स्या-दशक्येऽपि सुचेष्टिते।
उच्यते शुद्धपक्षः स, सर्वशष्पैककन्दलः ।।४।।
एतच्छुभानुबन्धं हि, द्वितयं मुक्तिमुच्यते।
शुभमेवानुबध्नाति, यत एतच्छिवावधि ।।५।।
हितमेतद् द्वयं यस्मा-दहितमितरं ततः ।
प्रतिपक्षभूतो यस्मात्, प्रतिपक्षो हि नापरः ।।६।।
सूते शक्यसमारम्भः, क्षयोपशमपाटवम्।
हन्ति शुद्धस्य पक्षस्तु, तल्लाभविघ्नमण्डलम् ।।७।।

* पू.आ.श्री भुवनभानुसूरिसाम्राज्यवर्त्ती।

विशेषादत्र वक्तव्यं, ज्ञेयं तद्धेत्वनुष्ठितेः ।
मुक्तिबीजक्रियाबीजं, यदेतत् तत्र दर्शितम् ।।८।।

(शार्दूलविक्रीडितम्)

शक्यारम्भमतस्तनोतु भविके, संशुद्धपक्षं तथा,
प्रत्यागच्छतु तद्विपर्ययकृतेः, संसारदुःखाम्बुधेः।
पीत्वैतामनुभूतिसञ्चरसुधां, माधुर्यधुर्योपमां,
शश्वज्जन्मजरामृतिव्यतिगतं, प्राप्नोतु शर्मास्पदम् ।।९।.

इति
न्यायविशारद-महो.श्री यशोविजयगणिप्रणीत-
अध्यात्मसार-आत्मानुभवाधिकारांशे
श्लौकवार्त्तिकात्मक
मनुभवामृतम्

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

-*मुनिश्री सम्यग्दर्शनविजयगणिः

(परमश्रद्धेयवाचकवर्याणामनुपमं चरितं पञ्चमाङ्काद् यत् प्रारब्धं तत्र भारतवर्षे गूर्जरदेशे-कनोडाग्रामशोभावर्णननामप्रथमस्तबके शिशिरवसन्तर्तुवर्णनं कृत्वाऽधुना ग्रीष्मादिवर्णनं प्रस्तूयते)

**ग्रीष्मकाले** तन्नगरमर्ककिरणप्रभावात् पक्वमिव। प्रचण्डवातैश्च प्रहतो लोको मार्गं त्यक्त्वा स्वगृहं समाश्रयति। भास्करेण तरुणवृक्षसमूहाः शुष्यन्ते, प्राणिनां शरीरबलमपि कृश्यते, पिपासया बाध्यन्ते मनुजतिरश्चः, तीव्रघर्मेण जनसमूहो दह्यते, ततः स्वेदेन निरन्तरं खिद्यते, भानुप्रतापेन प्रमुदितो दिनोऽपि वर्धितो यदुक्तं-स्वामिनोऽभ्युदये सेवका अपि सन्तुष्यन्ते एव"।

किन्त्वीदृशेऽवसरेऽपि कनोडानगरपरिसरे प्रवहन्त्याः रूपेणनामनद्याः प्रभावेणैव तीरस्थवनराज्यः विकसिताः सञ्जाताः। तत्रर्तौ मल्लिका विदलिता, किन्तु जात्यपाटला वितता जाता, शिरीषवनं त्वभिनवसुरभिसुरभितरकुसुमसञ्चयसञ्चितं जातम्।

तदा नागराणां हृदयस्था मालतीमाला मौक्तिकमालेव प्रमोदं प्रसारयति, सुधांशुकरनिकरः प्रसन्नतां वितनुते, नदीपुलिनवदतिकोमलतूलीकायुक्ताः पल्यङ्का एव मनोरमाः भान्ति, चन्दनविलेपनान्येव पुनः पुनः क्रियन्ते, तालवृन्तान्येव नरीनृत्यन्ते, सुखायन्ते शिशिरकुसुमस्रस्तराः जनानामिति।

इत्येवंभूतेऽवसरे बहिर्गन्तुमनसो लोका वदन्ति न कुत्राऽपि गन्तव्यमस्माभिः साम्प्रतम्। यतो गमने सन्तापकरो दारुणोऽवसरः, नैवंविधेऽध्वनि गन्तुं शक्नुमः,

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

मासद्वयानन्तरं गन्तव्यम्, यदा शीतलो मार्गो भविष्यति, तदैव सत्वरं गन्तव्यम् नाधुनेति मन्वाना ये व्यवसायार्थं परदेशं गता अभूवन् तेऽपि जगत्तापिघर्ममनुभूय सखेदाः स्वललनां स्मृत्वा द्रुतं गृहमायान्ति।

कदाचित् तत्र **प्रावृषि** यत् प्रवृत्तं, तद् यथा-वर्षायामगर्जत्यपि मेघो वर्षति, कदाचित् तु मेघो गर्जति, तदा जगत्त्रासकरो भवति। परिपुष्टपयोधारया कृत्स्नं जगत् प्लावयति। स्वप्रभावेन भास्करमपि छादयति। स्वगर्जनया तन्नगरस्य कीर्तिकथां कल्लोलयति, 'एतन्नगरं पृथ्व्याः भूषणमिति' ज्ञापनार्थमिव समुज्ज्वलद्विद्युत्प्रभया स तं दर्शयति, कारयति जनानां गमनागमनेऽपकर्षम्। ग्रीष्मखिन्नजनानानन्दयति पुनः पुनः। स्थगयति प्रवासेच्छून् जनान् 'मयि वर्षति सति मार्गं गच्छन्तीति' ममापमानकर्तॄन् नरान् ताडयामीति वारिणा वारं वारं प्रहरति। एतादृशोऽपि मेघो न दोषाय किन्तु गुणायैव भवति। यतः स निष्पादयति तत्र प्रभूतं शस्यम्। समृद्धयति समस्तान् देशान्। एतादृक्समये कामिजनाः स्वप्रियां पुनः पुनः प्रार्थयन्ति तत्सुखोन्मुखाश्च भवन्ति।

इत्येवं पूर्णरूपेणनद्याः जलधिजलवदुच्छलद्वेलाकल्लोलमालासमालिङ्गित-शोभायमानं तीरपरिसरं नैकजनानाकर्षति स्म।

वर्षासमाप्तिं ज्ञात्वा जना अन्यग्रामं गन्तुमनसो नौकायानेन परतीरं गच्छन्ति पुनश्चाऽऽन्यान्यग्रामवासिनः प्रभूता जनाः समागच्छन्त्यत्र, गच्छन्ति च हृदयविश्वासैकनिकेतनं स्मर्णादेवीमन्दिरं प्रति, देव्याः पूजार्चावन्दनदर्शनेभ्यः स्वेच्छापूर्त्तिश्च कुर्वन्ति स्म।

तस्मिन् समये तन्नगरबहिर्भागवर्तिस्थानस्य शोभा बृहत्तरतीर्थभूमिसमा सञ्जाता अथवा तन्मन्दिरप्रभावाद् कनोडानगरशोभाऽवर्णनीया नवीना जाता।

वर्षर्तुर्गता, किन्त्वस्य शोभा न गता, यतः सदा कुसुमितमिवेदं नगरं सर्वशोभासिद्धमिति लगति।

तेजस्विषु भास्करतोऽधिकः कः, तरुषु कल्पवृक्षाधिकः कः? सुगन्धवत्सु सारं चन्दनं, वनेषु ज्येष्ठम् नन्दनवनं, मृगेषु श्रेष्ठः मृगपतिरेव, यथा तारासु चन्द्रोऽधिकः प्रभाववान्, खगेषु खगपतिरेव, नदीषु गङ्गा, रूपवत्स्वनङ्गः, ध्वनिषु मेघनादो गंभीरः, यथा रसेषु इक्षुरसः वरिष्ठः, पुष्पेष्वरविन्दः, औषधेषु सुधा, वसुधाधवेषु रघुनन्दनः, सत्यवादिषु युधिष्ठिरः, निश्चलेषु ध्रुवः, मङ्गलेषु धर्मः, धर्मेषु दया, दानेष्वभयदानम् तथेदं नगरं गूर्जरराष्ट्रेषु स्वशोभया प्रधानम्।

नरेषु नीरोगत्त्वं हि प्रशस्यते, मन्त्रेषु च नमस्कार एवोच्यते। यदि कदाचिद् भवेद् विषगुणधार्यमृतम्, पश्चिमोदयी सूर्य:, पूर्णिमायां निष्कलश्चन्द्र:, किन्त्वमरा-वत्यधिकशोभाधारिकनोडानगरशोभया सार्धं स्पर्धाक्षमम् नान्यद् नगरम्। तेनैवान्यनगरस्य कवय: सगौरवं पुन: पुन: काव्यरचनया तस्य कीर्तिपताकां विस्तारयन्तीति स्मर्णादेवीमन्दिरस्य दर्शनार्थं गत्यागतिकृन्नरान् दृष्ट्वा मन्येऽहम्।

**शरदृतावपि** नदीवापीकासारवनराजीलतोद्यानगहनवनेषु शोभा दिनप्रतिदिनं वर्धत एव। तत्र घनात्यये कलहंसानां मञ्जुलकलरवा नगरसुन्दरतां कथयन्त: पथिकजनकर्णौ पवित्रीकुर्वन्तीव। तदा कलापिततिस्तु तूष्णींभूता: घनकलाभावात्। सरांस्यपि स्वमलिनतां दूरीकृत्य शुचिभूतानि। सर्वत्र विहगा: स्वकूजितै: विनोदयन्ति स्वान् परांश्च। वृक्षा अपि स्वां शोभां निष्पादयन्ति नवै: नवै: फुल्लै:। नागरा अपि स्वच्छोदके कासारे स्नात्वा पुन: पुन: स्वशुद्धिं प्राप्नुवन्ति स्म।

**हेमन्ते**-तीव्रतरशीतै: स्फुटं दन्तवीणैकवादनपरा जना अध्वनीनाश्चालसायन्ते। मार्तण्डप्रभावेऽपि शैत्यं स्वलीलां वितनुते स्म, नूनं तेनैव दु:खार्तानि दिनानि ह्रस्वानि जातानि। शीतरश्मे: करप्रचारे सति पुन: पुन: पीयूषधाराभोज्यात् पुष्टै: चकोरै: शीतरश्मे: सौहार्देनैव रजन्य: दीर्घतरा: कृता इत्याशङ्के। सर्वत्र वनमुपवनं विकसितमभवत्। तदा संपूर्णं नगरं नागराणां यथेच्छकेलिभुवनं सञ्जातमिव।

तन्नगरस्य सदैव **प्रात:कालीना** शोभाऽप्यभिनव दृश्यते। तदा प्रात: सूर्यागमनात् पूर्वं रक्तवर्णं गगनं, निर्दलितध्वान्तपशुवपुर्निर्गतरुधिरालिप्तमिवाभाति। तन्नगरोपरिगगनेन परिभ्रमन् द्युमणि: शत्रुतेजोनाशकमणिवत् शोभते तत्तेजोऽसहमान: स्मर्णादेवीमन्दिरं नाशितुमागतसफरखानेनापि तन्न नष्टमिति मन्ये। प्रतिप्रातरम्बुजपाणि: सावेगं द्यामालिङ्गति, मन्येऽहं तदालम्बनेनैव नगरे लोका: प्रीत्यैव प्रवर्तन्ते, न तु परस्परं कलहायन्ते। यदुक्तं "यथा राजा तथा प्रजा:"। नगरस्य गुणतेजोऽभिभूता दिगपि सर्वतो म्लानमुखीवाभूत्। सूर्योदयात् पूर्वं यो ध्वान्तधूम: निरस्त: सोऽल्पसमयेनैव कनोडासमुन्नतिसूचकोऽस्तीत्यहं मन्ये। 'मम नववासरराज्यमभूदिति' मङ्गलार्थं करनिकरकुङ्कुमरसै दिवानाथेन पूजितमिव गगनं सर्वतोऽरुणं जातम्। भास्करागमनावसरे शकुननिस्वनै: परममङ्गलसङ्गीतगीति: प्रवर्तित्ता मङ्गलपाठकवत् जना अपि प्रवृत्ता निजनिजप्रवृत्तौ, दिनमणे: करनिकरा: प्रासरन् समृद्धनगरसेवाकरणार्थमिव। दिनकरेण कराङ्गुलीनिर्देशात् पुण्यपुरुषजन्मस्थानं व्यावर्णितमिव प्रात: तन्नगरमपूर्वहर्षोल्लासमुखरमभूत् नागरलोकनानाव्यापारकोलाहल-

व्याजेन । परमप्रीत्या स्वप्रियभानुकरकोमलकरस्पृष्टा: कमलिनीतति: रोमाञ्चितेव विकस्वरा जाता। तमोरिपुदलनात् तत्कण्ठाद् विदलिता विरला धूलीधूसरा मौक्तिकश्रेणीव गगने ताराततिश्च पाण्डुरा जाता। अर्कागमने प्रवर्धितोत्साहो लोकस्तद्दर्शितमार्गे प्रस्थितस्ततो विस्तीर्णो मार्गोऽपि सङ्कीर्णतां यात:, दिनकरकरनिकरारक्तानि पाषाणनिर्मितान्यपि गृहाणि पद्मरागादिमणिस्वर्णादिविशिष्टधातुनिर्मितानीव भान्ति। (क्रमश:-)

# यशोगूर्जरस्तवनानुवादः

-*मुनिश्रीआत्मदर्शनविजयः

(श्रुतज्ञानप्रचारकसभाप्रकाशनैर्वैक्रमीय २०७१ तमे वर्षे प्रकाशितगूर्जरसाहित्यसङ्ग्रह-पुस्तकस्थमहामहोपाध्यायश्रीयशोविजयगणिभी रचितगूर्जरस्तवनानां संस्कृतगद्यानुवादः क्रमशः प्रकाश्यतेऽत्र।)

५१. हे परमात्मन्! त्वद्ध्यानेन मया परमरसः (शमरसः) प्राप्तोऽस्ति, तेन नान्यरसेषु (तुच्छेषु) अहं माद्यामि।
हे नाथ! त्वद्दर्शनं मम हृदये स्पृष्टमस्ति, त्वं मदन्तःकरणे स्थितोऽसि अतस्तव गुणरससङ्गेनैवाऽहं माद्यामि ।।३।।

**(सामान्यजिनस्तवनम्-पत्राङ्कः-२१४)**

५२. हे प्रभो! तव गुणसागरे यदि मम द्वौ चत्वारो वा भावाः प्रवेशेयुः तर्हि तेऽक्षया अखण्डिताश्च भवेयुः। ततस्तव गुणेभ्यो सद्गुणानां भेदविचारो न स्थास्यति।।४।।
हे नाथ! तव कतिपया गुणा वर्ण्यन्ते? तव गुणास्त्वनन्ता अतः केवलं तव गुणस्मरणैः कीर्तनैश्च त्वं सर्वेषां तारको भवति ।।५।।

**(श्री जिनगीतम्-पत्राङ्कः-२१४,२१५)**

५३. गुरुकुलवासगुणयुक्तो व्यवहारे स्थैर्यभाक् साधुस्त्रिविधावञ्चकयोगेन सुजसमहोदयकामुको भवति ।।७।।

**(निश्चयव्यवहारगर्भितशांतिजिनस्तवनम्, ढाल-२, पत्राङ्कः-२२३)**

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

५४. यो मुनिः क्रियाञ्च ज्ञानञ्च प्रत्येकं क्रमेण स्वस्वस्थाने सेवते तस्य परमात्मा सुजसमहोदयं ददाति ।।९।।

**(निश्चयव्यवहारगर्भितशांतिजिनस्तवनम् ढाल-३, पत्राङ्कः-२२४)**

५५. व्यवहारनय एवं वदति यदुत, ''सर्वशास्त्रेषु भावः प्रधानतया प्रोक्तस्तत् सत्यम्। किन्तु क्रिययैव स सार्थको भवति, तया विना च स मिथ्या जायते।।४।।

यतः क्रियया नूत्ना भावाः प्रादुर्भवन्ति, प्राप्तपूर्वाश्च ते वृद्धिमन्तो भवन्ति।

तत्क्रियायोगाज्जीवो गुणश्रेणितो न पतति किन्त्वारोहत्येव। अतो मुनिः सर्वं क्रियायोगं साधयति ।।५।।

येन जीवेन शुद्धक्रियायोगस्तिरस्कृतस्तेन निश्चयतो निश्चयनयो न ज्ञातो भवति। यथा यथा क्रियायां भावः सङ्गच्छते तथा तथा पयसि शर्करावद् भावो मधुरतरो भावि ।।७।।

**(निश्चयव्यवहारगर्भितशांतिजिनस्तवनम्, ढाल-४, पत्राङ्कः-२२४,२२५)**

५६. साम्प्रतकालेऽपि सूत्रपरम्परया शुद्धसामाचारिपरम्परा प्राप्यते। यद्यपि प्राप्तसामाचारिविधिषु विनयप्रमुखमुद्राविधिर्बहुविधा दृश्यते, तथाऽपि न विरुद्धा सम्भाव्यते।

एवं सति यः सूत्रविधिषु विरूद्धत्वकल्पनया मुह्यति स मुग्धः ख्याप्यते; माध्यस्थवृत्त्या तु यः शुद्धसामाचारिविधिः सूत्रेषु योजयति स शास्त्रनीत्या बोधकः कथ्यते ।।१०।।

**(निश्चयव्यवहारगर्भित,शांतिजिनस्तवनम्, ढाल-५, पत्राङ्कः-२२७)**

५७. प्रीतिभक्तिरुपानुष्ठानद्वयकरणेन जीवस्य व्यवहारनयेन इच्छाप्रवृत्ति-विघ्नजयप्रभृतियोगः प्राप्यते। यद्यपि तद्धेतु-अमृतानुष्ठानापेक्षया पूर्वोक्तेऽ-नुष्ठानद्वये हीनतरे वर्तते, तथापि सद्गुरुपदेशेन सम्मतत्त्वात् ते शिवप्राप्तौ हेतुत्त्वं भजेते।।१०।।

यदा भव्यजीवस्य संसारपरिभ्रमणमेकपुद्गलपरावर्तोऽवशिष्यते, तदैव तस्य विधिशुद्धमोक्षहेतुभूतानुष्ठानकरणे मतिः प्रवर्तते। स एव क्रियावादी जायते। न चाधिकतरपुद्गलपरावर्तेषु वर्तमानो जीवस्तथाविधो व्यपदिश्यते, इति सुष्ठूक्तं दशाश्रुतस्कन्धचूर्णौ महात्मभिः।।११।।

**(निश्चयव्यवहारगर्भितसीमंधरजिनस्तवनम्, ढाल-२, पत्राङ्कः-२३१)**

५८. श्रेणिकनृपसदृशाः सम्यक्त्वप्राप्तौ सति केचिदेव पापेभ्योऽविरता गृहवासे तिष्ठन्ति, न तु सर्वे। यदा तु प्रबलचारित्रमोहनीयान्तरायकर्मणामुदयो वर्तते तदैव सम्यग्दृशः संसारे वसन्ति नान्यथा।

उत्पन्ने तु सम्यक्त्वेऽनुसमयं जीवः स्वचारित्रमोहनीयं क्षपयन् सर्वसावद्य-विरतिमाक्षिपति। एतदेव जिनशासनस्योपनिषदिति ।।६।।

पञ्चानुत्तरविमानवासिनो लवसप्तमिका देवा यद्यपि स्वायुष्यपर्यंत सम्पूर्णं ब्रह्मचर्यव्रतं पालयन्ति, तथापि चतुर्थगुणस्थानकेऽवस्थितानां तेषां ब्रह्मचर्यविरति-लाभो न भवति, अब्रह्माविरतत्वात्।

अब्रह्मदोषविरहेऽपि तन्नियमाभावात् सर्वपापानि सहजतया लगन्ति ।।७।।

**(निश्चयव्यवहारगर्भितसीमंधरजिनस्तवनम्, ढाल-३, पत्राङ्कः-२३२)**

५९. हे स्वामिन्! त्वमेवैको मम हृदये वसति, त्वमेव परहितकारी वर्तसे। अतः पूर्वविदेहस्थितेनापि त्वया मादृशभरतक्षेत्रस्थितभविकहितार्थमुपेक्षाकर्तुं न युज्यते ।।६।।

**(निश्चयव्यवहारगर्भितसीमंधरजिनस्तवनम्, ढाल-५, पत्राङ्कः-२३३)**

# श्री निःश्रेयसम्

षाणमासिकपत्रम्

६

खण्ड – ३

दीक्षाशताब्दि–

भावाञ्जलिः

# श्रीरामचन्द्रीयमहाकाव्यम्

अथ तृतीयसर्गः

**-*पंन्यासश्रीमोक्षरतिविजयगणिः**

कल्पवृक्ष उदगाद् गृहाङ्गणे, वर्षिताद्य धनमालया सुधा।
वीक्षिताः परमयोः कृपास्पृशा, भुक्तिमुक्तिरमयोर्वयं दृशा ।।१।।
।।रथोद्धता, अपरान्तिका वा।।

अस्मदीयनगरं पवित्रितं, कुर्वता पदयुगेन साम्प्रतम् ।
आविरक्रियत सर्वथोदयः, श्रीमहोदयपदप्रदस्त्वया ।।२।।

दानसंज्ञकमिति प्रशस्य तं, प्राञ्जलिर्मुनिवरं शुश्रूषया ।
आस्त तस्य विनयाज्जनः परः, श्रीजिनस्य मरुतामिव व्रजः ।।विशेषकम्।।

श्रीगुरुद्युगिरिमथ्यमानमुत्,-सागरोद्भवसुधासितस्मितम्।
तन्वता हृदयरागमिश्रितं, द्योतिता त्रिभुवनेन सा सभा ।।४।।

तं प्रबोधयितुमङ्गिनां गणं, गाः प्रसारयति स स्म सद्गुरुः।
चन्द्रमाः कुमुदिनीं यथा निशः, पद्मिनीं च रविरह्न आमुखे ।।५।।

भो नरा नरजनुवृषामृता,-पानयोग्यमिदमस्ति भाजनम्।
तत्र मृत्युकरणं युज्यते, क्लिष्ट[1]किल्बिषविषान्नभोजनम् ।।६।।

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

१. किल्बिषं पापम्।

श्रीः समुद्रतनयापि मुद्रया[1], कर्हिचिन्न सहितावलोकिता।
वाःश्रितास्ति सततं तथापि तन्,-मानसं व्रजति जातु नार्द्रताम् ॥७॥

प्रेयसी परिभवाय बान्धवा, बन्धनाय विषयाश्च मृत्यवे।
हा महान् नु जनमोह एष कः, शेमुषी स्वविषया स्वशत्रुषु ॥८॥

स्वार्थिने निजजनाय पाप्मनः, कारकः पतति दुर्गतौ परम्।
कश्चनापि तमनुप्रयाति नो, ता विहाय वृजिनावलीरहो ॥९॥

अन्तके किमपि हन्त कोपिते, नैव भावि शरणं शरीरिणः।
सज्जमाक्रमयितुं मृगद्विषं, संमुखं मृगशिशोरिवेक्षितुः ॥१०॥

जीवितं च जलबिन्दुचञ्चलं, सिन्धुवेगश्चपलं च यौवनम्।
सम्पदश्च जलबालिकाचला, आप्नुयात् किमवलम्ब्य शं जनः ॥११॥

शाश्वतं किमपि नापरं निजा-, दात्मनस्तदिह योग्य उद्यमः।
सोऽथ धर्मसुलभस्ततः सदा, धर्म एव शरणं शरीरिणः ॥१२॥

स द्विधा जिनवरैरुदीरितोऽ,-गेहिनामचरमश्च गेहिनाम् ।
पश्चिमश्च पुनरादिमं प्रति, प्रीतिपूतमनसां तनूमताम् ।।नवभिः कुलकम्।।

देशनामिति विभोर्निशामयँ-, श्चेतसि **त्रिभुवनो** व्यचिन्तयत्।
सत्यमेव मम तन्मनोगतं, यत्र साम्प्रतमिहासितुं भवे ॥१४॥

तन्मयापि भयदायिनं भवं, प्रोज्झ्य पूज्यपदवी वरिष्यते ।
इत्यसौ निरणयत् सुधीनिधी, रोमहर्षणविभूषिताङ्गकः ।।युग्मम्।।

कश्चनापि समयं प्रबोध्य तं, श्रीगुरुः प्रवचनादुपारमद्।
स्वश्रयं प्रति गतो जनोऽपि तत्,-पादयोर्विहितलुण्ठनोऽसकृत् ॥१६॥

१. मुद्रा-मर्यादा।

संयमीन्द्रचरणाम्बुजन्मनी, चुम्बितं **त्रिभुवनाननं** बभौ ।
मीलितुं स्वभगिनीं श्रियं श्रितां, तत्र रात्रिपतिरेतवानिव ।।१७।।

प्रेमसंयमधनस्य पादयो,-रुत्तमाङ्गमथ तेन नामितम् ।
शोभते सलिलसंभवे सिते, षट्पदावलिरिवैकदागता ।।१८।।

ऊचिवान् समवलक्ष्य संयतस्,-तं गभीरमधुरस्वरेण यद् ।
वत्स! संसृतिरियं न युज्यते, त्वादृशां समयमात्रमासितुम् ।।१९।।

प्रत्युवाच विनयानतः प्रभुं, शर्करामधुरया गिरा स यद्।
नाथ नाथति[१] मनस्तु मे भवत्,-[२]पादतामरससेवनं चिरात् ।।२०।।

ग्राह्य एव सुत! संयमस्त्वया, नैव किन्तु मम जीविते सति।
एतदेव गुरुदेव! मां भृशं, बाधते पितृपितामहीवचः[३] ।।युग्मम् ।।२१।।

दन्तदीप्तिपरिदीपितस्मितः, संयतः कथयति प्रधीः स्म यत्।
को गमी प्रथममित्यवैति को, ऽनित्यताविधुरितावनौ वद ।।२२।।

स्यन्दमानसुधमद्भुतं मुहुः, साधुराजवचनं पिबन्निदम्।
लब्धचेतन इवोन्मिलन्मिल,-ल्लोचनः क्षणमसावचिन्तयत् ।।२३।।

सत्यमेव गुरवो वन्दन्ति यद्, वेत्ति कश्चिदपि नात्र निश्चितम्।
कः कदा क्व भविता कथं नरः, शासनस्य [४]शमनस्य गोचरः ।।२४।।

तत्त्वरे[५] स्वहितमेव साधितुं, यावदेति यमशासनं नहि।
आः [६]किमन्धुखननं, कृशानुना, [७]प्लोषिते समुचित्तं स्वसद्मनि ।।विशेषकम्।।

चिन्तयन्निति सबाष्पदृग्गलः, स न्यवेदयदृषीश्वराय यद्।
देव! ते वचनहार्दमाप्नवं, काममस्यनुगृहीतवान् मयि ।।२६।।

१. काङ्क्षति। २. कमलम्। ३. पितुः पितामही। ४. यमस्य। ५. तत् तस्मात् त्वरे त्वरां कुर्वे ६. अन्धुः कूपः ७. दग्धे सति।

केवलं न समयोऽद्य विद्यते, संयमादितिकृते यतो मम।
मातुलाः पितृपितामही च मां, बाधितार इति भासते प्रभो! ।।२७।।

तत्कथञ्चन पलाय्य मन्दिरा, -दाव्रजामि भवदन्तिके यदा ।
यत्र तत्र भवता तदाशु मे, देय एव गुरुदेव! संयमः ।।विशेषकम्।।

एवमस्तु तव चास्तु वर्त्मनि, श्रेय इत्यचकथत् तपोधनः।
मन्दिरं स्वमपरः प्रयातवान्, प्राञ्जलिर्नतशिराः सहाश्रुदृक् ।।२९।।

तत्प्रभृत्यवसरावलोकनं, कुर्वता स्म भवने समास्यते ।
सावधानमनसा समर्थिका, -नन्दनेन सदने रिपोरिव ।।३०।।

पक्षिणः सततमक्षिपक्षयोः, पञ्जरस्थितवतो मुमुक्षुता।
यादृशी **त्रिभुवन**स्य तादृशी, नेत्रयोर्गृहगतस्य दृश्यते ।।३१।।

तादृगाकृतिमथावलोक्य तं, धर्मकर्मनिरतं कुटुम्बिनः।
अन्यदा व्रतगृहीतिचिन्तनाच्, चालनाय विविधं वचोऽभ्यधुः ।।३२।।

हे कुलाभरण! यैर्विलोचनै, -र्वत्स! सार्द्धशतमीक्षिता मया।
मानवाः पृथुकुलेऽत्र पुत्रक!, त्वं हि तेषु रमसेऽधुनैककः ।।३३।।

किञ्च तेऽस्ति बिसतन्तुकोमला, काययष्टिरियमस्ति बालता ।
ऋद्धयोऽतिधनदर्द्धयोऽखिलास्, -तास्तवैव विलसाऽऽभिरन्वहम् ।।३४।।

प्रौढतामुपगतश्च संयमं, त्वं ग्रहीष्यसि सुभुक्तभोगकः ।
वृद्धयेति गदिते विनीतता, -पूर्णधीः प्रतिजगाद तामिति ।।३५।।

रे स्वकीयकुलवृद्धिमम्बिके!, मानवा न पशवोऽपि कुर्वते।
मत्सुधर्मकुलवृद्धिरेव चेद्, भाविनी वद तदापदस्ति का ।।३६।।

बाधकं न सुकुमारतादिकं, कार्यसाधनकृते मनस्विनः।
गर्जिते[१] पतति कुञ्जरेश्वरे, बालकोऽपि किमु केशरी नहि ।।३७।।

वत्सरे व्रतगृहीतिरष्टमेऽ,-र्हन्मता मम पुनर्युगद्वयम्।
निष्फलं हि ऋतुचक्रमीयिवन्,-मेदिनीरुह[२]इवावकेशिनः[३] ।।३८।।

दुःखलेशरहितं निजात्मजं, शाश्वतं सुखमनूनमैक्ष्य च।
गर्द्धवृद्धिकृतिदुःखदायकेऽ,-स्थायिभोगनिवहे रमेत कः ।।३९।।

किञ्च यस्य शमनेन मित्रता, यः पलायितुमलं ततोऽथवा[४] ।
यस्त्रिकालमथवा विबोधति, श्वः स एव न परः प्रतीक्षते ।।नवभिः कुलकम्।।

ज्ञाततद्व्रतसमुत्कमानसा,-स्तेऽथ भीषयितुमारभन्त यत्।
प्रव्रजिष्यसि विनास्मदाज्ञया, विद्धि तन्न परिणामसुन्दरम् ।।४१।।

किञ्च नोऽनुमतिमन्तरेण यस्-त्वां हि संयमयिता स दण्डभाग्।
घोषयाम इति दैनिके वयं, [५]पत्र एतदपि बोध साम्प्रतम् ।।युग्मम्।।

दन्तकान्तिशुचिगण्डयामलं, योजयन् वदनवारिजं गिरा।
मातुलान् प्रतिबभाण सोऽभयं, भव्यवैनयिकधीरधीरिति ।।४३।।

पूजनीयचरणाः कथं वृथा, खिद्यतामिति भवद्भिराकुलैः।
अस्ति मन्मनसि संयमस्पृहा, कापि यां दमयितुं न कोऽप्यलम् ।।युग्मम्।।

कोपितांस्तदनु वीक्ष्य मातुलान्, वृद्धयाशु परिषद् विसर्जिता।
भागिनेयमनयन् कदाचन, [६]प्राड्विवाकसविधे कथञ्चन ।।४५।।

सोऽवदत् किमपरा विना गृह,-त्यागमस्ति न वृषार्थिनां गतिः।
किन्नु केनचिदपि क्वचिद् वृषः, सेव्यते नहि गृहस्थितेन किम् ।।४६।।

१. मदोन्मत्ते। २. वृक्षस्य। ३. वन्ध्यवृक्षस्य। ४. तस्मात्=शमनात् ५. समाचारपत्रे ६. न्यायाधीशः।

मोहकस्मितमनेन कुर्वता, तत्क्षणं त्रिभुवनेन भाषितम्।
सेव्यते स भवतैव भोः कियाँ-स्तात! चिन्तयतु तद् भवान् स्वयम् ।।४७।।

उत्तरेण वरयुक्तिनामुना, स्थेयकः[१] स तु निरुत्तरीकृतः।
तानुवाच यदमुष्य सर्जनं, निश्चितं व्रतकृते व्यधाद् विधिः ।।४८।।

एकदाथ वटपद्रपुर्यसा,-वास्थितः स निलये पितुःष्वसुः।
**दान**साधुधवसङ्गतिं तदा, स्वस्य तत्र सुलभां न्यभालयत् ।।४९।।

धीधनस्त्रिभुवनो वनेशवन्, निर्भयस्त्वरितमेव गेहतः।
निर्गतः स्वजनदृक्पथं त्यजन्, **दान**साधुचरणावुपाश्रयद् ।।५०।।

अब्रवीत्परमवत्सलः स यद्, गच्छ **जम्बु**सरसंज्ञकं पुरम्।
तत्र **वीर**विजयस्तव स्पृहां, पूरयिष्यति यतिक्षितीश्वरः ।।युग्मम्।।

यातयोर्दिवसयोर्दिने वरे, वर्तते व्रतमुहूर्तमुत्तमम्।
मा विलम्बनमथो वृथा कृथा, भद्रमस्तु तव भद्र! वर्त्मनि ।।५२।।

मङ्गलाभिहितिशम्बलं गुरोः, शंसमाप्य तरुणः स एककः।
एति मध्यरजनौ स्म तत्पुरं, तीर्णवर्त्मगतविघ्नवारिधिः ।।५३।।

स प्रणम्य गुरुपादमादराद्,-धृद्गतं स्म वदति व्रतोत्सुकः ।
स्वामिनि त्वयि मम व्रतादिति,-स्तिष्ठते[२] कुरु गुरो कृपामिति ।।५४।।

सोऽवदद् यदिह मुक्तिरक्त! ते, संयमग्रहणमस्ति नोचितम्।
तत्प्रगेऽन्तिकपुरं प्रयास्यते, नूनमाश्वसिहि निर्भयो भव ।।५५।।

सान्त्वितोऽपि विविधाभिरुक्तिभि,-र्नास्वपन् निशि कथञ्चनापि सः।
आगतं स्ववसरं चिरादिमं, साधितास्म्यथ नवेति चिन्तया ।।५६।।

१. न्यायाधीश इति व्यवहारप्रसिद्धनामा २. मद्व्रतग्रहणाधारस्त्वमेवेति भावः।

स प्रगे गुरुभिराप तत्पुरं, किन्तु तत्र नवविघ्न आपतत्।
तं तदेक्षितवती [1]पितुःस्वसा, -ऽपृच्छदत्र कथमागमस्तव ।।५७।।

वन्दनाय गुरुदेवपादयो, -रित्यनेन लघु विप्रलम्भिता।
सा गताथ बहुशङ्कितो गुरुः, पृष्टवानिममियं तु का न्विति ।।५८।।

देव! सा मम पितुःष्वसास्ति तन्, -न व्रतग्रहणमत्र युज्यते।
आः करोमि किमथ श्व एव यन्, -नाथ! संयममुहूर्तमस्ति मे ।।५९।।

तत्कुरुष्व गुरुदेव! सत्वरं, साम्प्रतं किमपि मावधीरय।
मन्मनोरथरथस्य सारथे! मङ्क्षु मां व्रतमहालयं नय ।।६०।।

इत्यनेन गदिते सगद्गदं, वाचकः श्रमणमेकमादिशद्।
याहि गन्धारतीर्थमुत्तमं, तत्र दीक्षय रयादिमं दमिन्! ।।विशेषकम्।।

तत् प्रपद्य गुरुशासनं शमी, सायमेव सपरः [2]प्रयातवान्।
तेन च त्रिभुवनोऽपि चेतसा, काञ्चनाचल इवाचलोऽचलत् ।।६२।।

कुत्रचित् कथमपि क्षपाममी, प्रोष्य गन्धपुरतीर्थमाययुः।
तत्क्षणं तदितरे च पूर्वसङ्केतिताः कतिपया जना अपि ।।६३।।

शीर्णजीर्णजिनमन्दिरं द्रुतं, मध्यमेऽहनि समे समैयरुः।
तत्र चावरणवर्जिते तदारभ्यत व्रतविधिः सुमण्डपे ।।६४।।

श्रीजिनाँस्त्रिभुवनश्चतुर्मुखाँस्, -त्रिः प्रदक्षिणयति स्म हर्षितः।
लङ्घयन्निव भवाटवीपथं, योजनानि क्रमशः पदे पदे ।।६५।।

अर्हतस्त्रिभुवनः कृपासुधा, -वर्षिणोर्नयनयोर्निमज्जयन्।
संयमग्रहविधावराजत, स्वं पुनन् विमलयन् विलोचने ।।६६।।

१. इयं चान्या पितुः स्वसा २. सद्वितीयः

आगतोऽथ सुचिरप्रतीक्षितः, श्रीरजोहरणधारणक्षणः।
हर्षसागरमतीव संयम-प्रार्थिनः परित उत्तरङ्गयन् ॥६७॥

सर्वकर्महरणक्षमं परं, श्रीरजोहरणरत्नमादराद् ।
मङ्गलेन मुनिना समर्पितं, स्वीकृतं त्रिभुवनेन सस्पृहम् ॥६८॥

हस्तयोस्त्रिभुवनस्य नृत्यतस्, -तद्रजोहरणमेवमाबभौ।
मङ्क्षु मोक्षमधिरोढुमिच्छया, पक्ष एष नु धृतोऽमुना नवः ॥६९॥

दीपका विधिगता भृशं विदिध्यासवोऽपि पवनैः पयोनिधेः।
आविधि प्रबलपुण्यतो न विध्यातवन्त इदमीयतः खलु ॥७०॥

मङ्गलस्य शुभभाविगर्भितं, निर्ययाविदमृषेर्मुखाद्वचः ।
दीपकैः सममभीभिरेव ते, जीवनं श्रमणरूप भासते ॥७१॥

न्यायमार्गगमनादयं यतो, रामचन्द्रमपि जेष्यति प्रभुम्।
तस्य **राम**विजयाभिधामतो, मङ्गलां व्यधित **मङ्गलो** मुनिः ॥७२॥

तत्त्वदर्शननिधीन्दुवत्सरे, **प्रेम**साधुपदपद्मषट्पदः।
पौषमासिकसितत्रयोदशी, -सत्तिथौ स समयंस्त सुव्रतः ॥७३॥

सम्राड्बोधकसूरिहीरविजयैः प्राग् यत् पवित्रीकृतं,
तीर्थत्वेन च विश्रुतं वसुमतीपीठे यदासीच् चिराद्।
कालाद् यत् कियतः क्षरत्प्रभमभूद् दीक्षोत्सवात् तस्य तत्
श्रीमद् गन्धपुरं विराजति पुनस्तीर्थोत्तमं सुप्रभम् ॥शार्दूलविक्रीडितम्॥७४॥

इति श्री रामचन्दीयमहाकाव्ये विशुद्धमोक्षमार्गप्ररूपकदीक्षायुगप्रवर्तकशास्त्रीयसत्य-समर्थकपूज्यपादाचार्यदेवश्रीमद्विजयरामचन्द्रसूरीश्वरचरितवर्णनात्मके तृतीयः सर्गः॥

# सूरिशमवचनामृतम्

**-*मुनिश्रीप्रशमरतिविजयः**

जीयाज्जगज्जीवयोनि-विज्ञाता जगतां गुरुः ।
जगदानन्दनो वीरो, जगद्भ्राता जगत्पतिः ॥१॥

जगत्पितामहो जीयाद्, भगवान् करुणालयः ।
श्रुतानां प्रभवः स्वामी, तीर्थेशानामपश्चिमः ॥२॥

धर्ममार्गप्रदो लोके, महात्मा जयताच्चिरम् ।
नन्दीसूत्रस्य प्रारम्भे, संस्तुतो मोक्षदोऽस्तु वः ॥३॥

अनन्तोपकृतोऽर्हन्तः, श्रीमन्तो यदुपादिशन् ।
तदेव सर्वदा चित्ते, धारणीयं शुभेच्छुकैः ॥४॥

संसारे दुःखमेवास्ति, जन्ममृत्यादिसङ्गते ।
तस्मिन् सौख्यरसाकृष्टा, बध्यते कष्टकोटिभिः ॥५॥

दुःखेनारभ्यते जन्म, दुःखेनान्तश्च जन्मनः ।
अनयोर्मध्यभागेऽपि, दुःखानामेव सङ्गमः ॥६॥

असारेऽपारसंसारे, जीवाः सौख्याभिलाषिणः ।
यत् कुर्वन्ति तदेतेषां, दुःखानां वर्धकं भवेत् ॥७॥

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

सौख्यं संपद्यतां सर्वं, स एष भवरागिणः ।
विचारस्तस्य सौख्यानां, विनाशस्यैव कारणम् ॥८॥

सुखं प्रभूतसामग्र्या, जीवानां लभ्यते यदि ।
चिन्ताभारैः पराभूता, लक्ष्मीवन्तस्ततः कथम् ॥९॥

सुखं परिग्रहे पश्यन्, तदर्थं यतते सदा ।
दुःखैराबध्यमानं स्वं, नावगच्छत्यबोधवान् ॥१०॥

सौख्यभोगे मदोन्मत्ता, निर्विवेका न जानते ।
पुण्यनाशं पापबन्धं, दुर्गतिं दुष्टभावनाम् ॥११॥

केनचित् सुकृतेनाप्तं, पुण्यं पूर्वभवे वरम् ।
केवलं सौख्यलिप्साभि-र्नाशनीयं न सज्जनैः ॥१२॥

पापादेव हि दुःखानां, संपातो दारुणो भवेत् ।
सौख्यादेव च पापाना-मात्मना स्यात् समागमः ॥१३॥

सुखं सांसारिकं नूत्नैः, कर्मबन्धैः समुद्भटैः ।
ददाति दुर्गतिं जीवं, तुच्छानन्दादनन्तरम् ॥१४॥

देहसंपत्कुटुम्बाद्यैः, सौख्यसंपादने रतः ।
भावनां पावनां दूरे, जहात्यध्यात्मसाधिकाम् ॥१५॥

सुखं दुःखं मनोभावै-र्जायतेऽत्राहुरुत्तमाः ।
मन एव मनुष्याणां, कारणं बन्धमोक्षयोः ॥१६॥

चित्तं सौख्यरसालीढं, दुःखं सोढुं न पारयेत् ।
हीने सौख्यरसे दुःखं, सहसा सह्यते नरैः ॥१७॥

दुःखमायाति संसारे, तत्र नास्ति नवीनता ।
भवे भवेन्न चेद् दुःखं, ततस्तत् किं शिवे भवेत्? ॥१८॥

अनादेरत्र संसारात्, सर्वाधिव्याधिसंयुतात् ।
संपन्नाः सौख्यरागस्य, दुःखद्वेषस्य वृत्तयः ॥१९॥

अज्ञानेनावृतैर्जीवैः, स्वभावो विस्मृतो निजः ।
सुखदुःखोपनिर्वृतः, शान्तः कर्मोदयाहतैः ॥२०॥

यस्मिन् पश्यत्यसौ सौख्यं, तत्र दुःखपरंपरा ।
कारुण्यसागरैः श्रीमज्-जिनेन्द्रैरुपदर्शिता ॥२१॥

जीवः शरीरसंयोगाद्, दुःखानामस्ति भाजनम् ।
देहे रागाद् भवेज्जीवे, सौख्यदुःखादिवेदनम् ॥२२॥

कायेन रहिताऽवस्था, प्राणिना लभ्यते यदा ।
दुःखानां लवलेशोऽपि, तदाऽस्मिन्नावशिष्यते ॥२३॥

शरीरं पुद्गलोपज्ञं, जातं कर्मप्रभावतः ।
कर्मनाशप्रवृत्तस्य, दुःखनाशो ध्रुवं भवेत् ॥२४॥

दुःखमेकं हि संसारे, कर्मसत्तापराश्रयः ।
सौख्यमेकं हि संसारे, कर्मसत्तापराजयः ॥२५॥

धनाद्युपार्जने जीवैः, पुरुषार्थो विधीयते ।
तथैव कर्मनाशाय, यतनीयं विशेषतः ॥२६॥

येन देहे निरासक्ति-र्येन कर्मक्षयो भृशम् ।
स धर्मः श्रेयसां मार्गो, भवान्तो येन जायते ॥२७॥

स्वतन्त्रेण विचारेण, कल्याणं नोपपद्यते ।
भगवद्वचनाभ्यासाद्, धर्मलाभो महोदयः ॥२८॥

सर्वदा सौख्यदुःखाद्यै-र्द्वन्द्वभावैरुपावृतः ।
भवे भवेऽभवज्जीवो, न पुनर्धर्मचिन्तनैः ॥२९॥

तेन भोगादिप्रवृत्तिर्जीवस्य सहजाऽभवत् ।
आराधनाविचारस्तु, दुर्लभश्चापि दुष्करः ॥३०॥

मोहाधीनां दशामेव-मात्मधर्मवियोजिताम् ।
धारयन् सुखदुःखानां पतेद् विभ्रमताण्डवे ॥३१॥

सम्यग्दर्शनसंपन्नो, दुःखचित्तं जयत्यरम् ।
मिथ्यात्वबाधितो दुःखै-रन्तरङ्गैर्निपीड्यते ॥३२॥

दुःखे द्वेषात् सुखे प्रीतेः, सर्वः सांसारिको जनः ।
यत् करोति ततस्तस्य, दुःखवृद्धिः सुखव्ययः ॥३३॥

रागो द्वेषश्च जीवस्य, सदैव सहगामिनौ ।
अनयोस्तीव्रतावेशः, चित्स्वभावस्य बाधकः ॥३४॥

तत्र रागस्तु जीवस्य, महाशत्रुर्महाबलः ।
येन रागो जितस्तेन, निर्जितं सकलं जगत् ॥३५॥

यदवाप्तं यदिष्टं च, तत्र रागप्रवृत्तयः ।
रागेऽतृप्ते च जायन्ते, विकारा द्वेषवासिताः ॥३६॥

सुकरो द्वेषविजयो, दुष्करो रागनिग्रहः ।
रागादपेतचित्तस्य, सर्वसौख्यसमागमः ॥३७॥

न तद् भूतं न तद् भावि, यद् रागेणातुरो जनः ।
प्रसन्नः स्यात् प्रशान्तः स्यात्, प्रबुद्धः स्यात् कदाचन ॥३८॥

दुःखानां विरहेऽभीष्टे, सौख्यानां चैव सङ्गमे ।
निर्वाणपदसंप्राप्तिः, काङ्क्षणीया विशारदैः ॥३९॥

सर्वदा जीवितं नायुः, क्षीयते परमे पदे ।
नान्येषां सहयोगेन, जीव्यते परमे पदे ॥४०॥

न रोगो नो जरा नैव, क्षुधा तृट् परमे पदे ।
दुःखस्यात्यन्तिको नाशो, निरन्तः परमे पदे ॥४१॥

सर्वेषामेव सौख्यानां, संवित्तिः परमे पदे ।
आत्मनः कर्मनिर्मुक्त-स्वातन्त्र्यं परमे पदे ॥४२॥

परमानन्दसंयोगोऽनिर्वर्ण्यः परमे पदे ।
ततः श्रेयोऽर्थिना नूनं, गन्तव्यं परमे पदे ॥४३॥

अनवाप्य शिवस्थानं, सुखान्याप्तुं य इच्छति ।
पिपासाव्यथितः सोऽयं, मृगनीराणि वाञ्छति ॥४४॥

स्थापितो हृदये मोक्षो, येन कल्याणकारिणा ।
तेनैव धर्मसंयोगः, पवित्रः सफलीकृतः ॥४५॥

पुत्रात् पत्न्यास्तथा पित्रोस्तुष्टिमिच्छन्ति जन्तवः ।
निजात्मनः सकाशात् तु, नेष्यते सा कथं ननु ॥४६॥

यावदिच्छा न पूर्यन्ते, तावद् दुःखोदयो ध्रुवम् ।
इच्छेव नावशिष्येत, तदा सौख्यं समुत्कटम् ॥४७॥

इच्छाविसर्जनायेह, सोद्यमः यः स धार्मिकः ।
इच्छानुसारिणो हन्त, सर्वे जीवा अधार्मिकाः ॥४८॥

यथा यथा प्रकुर्वन्ति, कार्याणीच्छानुपूर्तये ।
तथा तथा समुद्याति, कोऽप्यसंतोषपावकः ॥४९॥

भगवानाह कर्तव्यं, नेच्छानुवर्तनं भवे ।
इच्छा संसारविस्तार-कारिणी दुःखवर्धिनी ॥५०॥ (क्रमशः)

# शमचन्द्रीयवचोऽमृतम्

-*साध्वीजीश्रीक्षमानिधिश्रीः

**✻ तद् भयङ्कर-दौर्भाग्यम्-**

जीवा यादृशं अर्थकामयोः पारवश्यं कुर्वन्ति, तादृशं मोक्षाशयेन धर्मसेवायामात्मसमर्पणम् कुर्यात्, तर्हि कीदृशः शोभनः परिणामः स्यात्, अपित्वेतदतीव दुष्करमस्ति।

श्री जैनशासने प्राप्ते सति ये सत्यं न जानन्ति सत्यावगमचिन्तामकृत्वा यथामति लिखन्ति वदन्ति च ते भीमदुर्दैवाधीनास्सन्ति अत्र तिलमात्रमपि शङ्काऽवकाशो न।

**✻ द्विधा पुण्यम् -**

पूर्वपुण्योदयेन जगदैश्वर्यप्राप्तिर्दुर्लभा न, किन्तुपुण्यानुबन्धिपुण्येन लब्धा सामग्री आत्मानं मूर्च्छितं न करोति, अतः प्रतिपुण्यं भिन्नत्वं बोद्धुमावश्यकमस्ति। यद्यात्मा पुण्यस्य विपाकस्याऽपि आधीनो भवेत्, तर्हि म्रियेत। (अर्थात् जीवन्नपि अजीवन्निव भवेत्)

**✻ पुण्यानुबन्धिपुण्यं सहाध्वगः -**

पुण्यानुबन्धिपुण्यमप्यावश्यकं मन्यमान आत्मा तत्-पुण्येन प्राप्तान् भोगान् त्याज्यानेव मनुते, पुण्यानुबन्धिपुण्यस्याप्यावश्यकता किमर्थं? तदर्थमेव यतस्तत् पथसहायमस्ति भवाटवीं लङ्घयितुं पुण्यानुबन्धिपुण्यं पथसहायकार्यं करोति। उचितमार्गं प्रति नयति, ततोऽस्य प्रतापेन वयं स्वस्थानं प्राप्तुं यावत् प्रगुणीभवामस्तावदस्य योगेन लब्धा सामग्री दूरे न भवति। पथदर्शकात् सावधानतया स्थातव्यम्। सहायकस्य भोजनं देयं,

✻ दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

पानीयमपि देयं तस्य संतोषोऽपि विधेयः, किन्तु नीवी (=मूलद्रव्यं) कदापि न दर्शितव्या, अस्य पुण्यानुबन्धिनोऽपि पुण्यस्य जातिः कीदृशी? तस्करस्य, कर्मजन्यत्वात्, व्याघ्रपालकः व्याघ्रं रमयति किन्तु स्वत्वचं लेढुं न ददाति यतो व्याघ्रे एषा विशेषताऽस्ति यत् तस्य लिहमानस्य माधुर्यं यदि लगति तदा स रदैः हन्तुं कालक्षेपो न करोति। तथा जडः स जड एव, पुद्गलम् तत् पुद्गलमेव, अत एव पापं लोहनिगडं कथ्यते, पुण्यं तु स्वर्णनिगडमुच्यते। अत एव तस्मात् यावत् कार्यं कार्यते तावत् कारितव्यम्।

**❋ वयं देहस्य दासा उत देहोऽस्माकम्?**

धर्मसिद्ध्यर्थं देहस्य रक्षा कर्तव्या किन्तु यदा जानीयात्, यदैष देहो धर्मप्रतिपक्षीभवितुं लग्नस्तदा तं त्यक्तुमुचितम्।

अतः शास्त्रेषूक्तं यदग्नौ प्रविश्य मरणं श्रेयः किन्तु शीलविहीनं जीवनं न शोभनम्, शरीररक्षणव्याजेन धर्महीनता नागच्छेत् तत्र सम्पूर्णतया सावधानता कर्तव्या,

यदि वयं शरीरस्य किङ्करा भविष्यामः, तर्हि भयङ्करफलमागमिष्यति, यतः शरीरमोहोऽनेकानर्थानाम् मूलमस्ति प्रथमसंहननस्वामिभिस्तीर्थङ्करदेवैस्तेन शरीरेण किम् साधितं? तेन शरीरेण तैः पुण्यपुरुषैः मुक्तिरेव साधिता।

**❋ निरुपमं शासनसौन्दर्यम् -**

श्रीजिनेश्वरदेवस्य शासने दीनोऽपि जनः साधुर्भवितुमर्हति, श्रीमानपि साधुर्भवितुमर्हति, सामान्यराजानोऽपि साधवोऽभवन्, चक्रवर्तिनोऽपि साधवोऽभवन्, एतत् तु भवद्भिः श्रुतम्, भगवतः श्रीमहावीरदेवस्य पञ्चमगणधरदेवः सुधर्मास्वामी काष्ठहारकमपि प्रव्रज्यामयच्छत्, श्रेणिकनृपस्य मन्त्रीश्रीअभयकुमारश्चाज्ञजीवान् काष्ठहारकस्य तस्य मुनेश्चारित्रस्य श्रेष्ठता युक्तियुक्त्या बोधितवान्, तस्य मुनिवरस्य चरणयोः नामितवान्, अतः 'स्पष्टमेव' यत् 'श्री जिनेश्वरदेवस्य शासने' चक्रिरङ्कौ द्वावपि दीक्षाधिकारिणौ स्तः, नवरं तस्यामेतावानेव नियमो यत् चक्रिणा स्वचक्रित्वं विस्मर्त्तव्यं, दीनेन च स्वदैन्यं, यद्येतद् तथा भवति तदा द्वावपि महात्मानौ। चक्रिमुनिरपि क्षणपूर्वदीक्षितस्य रङ्कमुनेश्चरणयोः स्वशिरो नामयति। एतदेव श्री जिनेश्वरदेवशासनस्य निरुपमं सौन्दर्यमस्ति।

**❋ भीषणो गर्व :-**

गर्वो भयङ्करोऽस्ति, कल्याणार्थी आत्मा गर्वपरवशो न भवेत्, तदर्थं सावधानीभूय तिष्ठेत्, गर्वनाशाय सद्भूतगुणवतो गुणस्यानुमोदना कर्त्तव्या, एषा

सम्यक्त्वस्य भावना भवति। सद्भूतगुणस्य श्लाघा तु सम्यक्त्वनैर्मलस्य निरूपमं कारणमस्ति।

**✻ सम्यग्दृष्टिः -**

सम्यग्दृष्टिः शान्तो भवति, न त्वुग्रः, स मनस्यसत्यस्य प्रवेशं न ददाति, सत्यं लघु न करोति, असत्यञ्च न नोच्चैः स्थापयति ।

**✻ कदा सद्गुणविकासः ? -**

मित्थ्यात्वे विद्यमाने दृश्यमानः शोभनोऽपि परिणामः वस्तुगत्याऽशोभनोऽपि भवेत्।

अतो ज्ञातुं शक्यते प्रधानवस्तुं विना गुणा अपि गुणाभासतुल्या भवन्ति। लक्ष्यं विनोग्रतपोऽपि शास्त्रकारेण कायक्लेशो भवतीत्युक्तम्, अतः श्री जिनेश्वरदेवस्याज्ञायाम-तुल्या श्रद्धा भवेत्, तर्ह्येव सद्गुणानां विकासः सहजो भवेत्।

श्री

# निःश्रेयसम्

षाण्मासिकपत्रम्

६

## खण्ड–४
## अर्वाचीन–
## कृतयः

# प्रवचनसारोद्धार
# खण्ड-१ प्राक्कथनम्

**-*मुनिप्रवरश्रीमुनिचन्द्रविजयः (अधुना मुनिचन्द्रसूरिः)**
***मुनिप्रवरश्रीपद्मसेनविजयश्च**

परमकृपालोः परमात्मनः सद्गुरुदेवानाञ्च निःसीमकृपया, बृहद्गच्छीयाचार्य-**नेमिचन्द्र**सूरीश्वरैर्विरचितस्य **श्रीचन्द्र**गच्छीयाचार्य**सिद्धसेन**सूरीश्वरकृत**तत्वज्ञान-विकाशिनी**-टीकोपेतस्य यथार्थाभिधानस्य **श्रीप्रवचनसारो**द्धारग्रन्थरत्नस्य ९७ द्वारात्मकः प्रथमः खण्डः प्राचीनहस्तलिखितादर्शादिविविधसामग्र्यनुसारेण संशोध्य सम्पाद्य च विदुषां पुरत उपन्यस्यते।

**ग्रन्थकृतां परिचयः**

ग्रन्थकृतां श्रीनेमिचन्द्रसूरीश्वराणां जीवनवृत्तं नोपलभ्यते कुत्रचित्। गुरुपरम्परा सत्ताकालश्च ज्ञायते श्रीमद्भिरेव विरचितस्य 'अनन्तनाथचरित'ग्रन्थस्य प्रशस्तितः। [१]गुरुपरम्परा चेत्थम्

बृहद्गच्छीयदेवसूरिः
|
अजितदेवसूरिः
|
आनन्दसूरिः (पट्टधर)

नेमिचन्द्रसूरिः (पट्टधरः) प्रद्योतनसूरिः (पट्टधरः) जिनचन्द्रसूरिः (पट्टधरः)

आम्रदेवसूरिः (शिष्यः) श्रीचन्द्रसूरिः (शिष्यः)

हरिभद्रसूरिः (मुख्यपट्टधरः) विजयसेनसूरिः (शिष्यपट्टधरः) नेमिचन्द्रसूरिः (शिष्यपट्टधरः) यशोदेवसूरिः (शि०प०) गुणाकरः (शिष्यः) पार्श्वदेवः (शिष्यः)

१ इयं गुरुपरम्परा पण्डित अमृतलाल मोहनलाल भोजक महाशयेन लिखितात्, "आख्यानकमणिकोश" ग्रन्थस्य प्राक्कथनात् उद्धृता । * पू.आ.श्रीभद्रसूरीश्वरसाम्राज्यवर्ती * पू.आ.श्री भुवनभानुसूरीश्वरसाम्राज्यवर्ती।

अनन्तनाथचरितग्रन्थस्य प्रशस्तिरेवम्-

अत्थि समुन्नयसाहो सव्वुत्तमपत्तविरइच्छाओ ।
सुकइजुओ बहुसउणो सिरिवडगच्छो वरतरु व्व ।।१।।

सुमणसमुणिंदसंसेवियक्कमो नायनिहियमणवित्ती ।
तम्मि पहू उप्पन्नो गुरु व्व **सिरिदेवसूरि** त्ति ।।२।।

तस्सऽन्नयम्मि जाओ निग्गंथसिरोमणी सुवित्तो वि।
सिरि**अजियदेवसूरी** कयंतबुद्धी वि कारुणिओ ।।३।।

तो संजाया **आणंदसूरीणो** जणियंजणमणाणंदा।
तत्तो य तिन्नि जाया मुणीसरा भुवणविक्खाया ।।४।।

सिरि**नेमिचंदसूरी** पढमो तेसिं न केवलाणं पि।
अवराण वि समयरहस्सदेसयाणं मुणिंदाणं ।।५।।

जेण **लहुवीरचरियं** रइयं तह **उत्तरज्झयणवित्ति**।
**अक्खाणयमणिकोसो** य **रयणचूडो** य **ललियपओ** ।।६।।

बीओ बीयसमुग्गयचंदकलानिक्कलंकतणुजट्ठी।
**सिरिपज्जोयणसूरी** तिव्वतवच्चरणकरणरओ ।।७।।

तइया य अमयरसवरिससरिससद्देसणा जणाणंदा।
**जिणचंदसूरि**पहुणो ससहरकरसरिसजसपसरा ।।८।।

सच्छत्तगुरुत्तगहीरयाहिं, लीलाए जेहिं निज्जिणिया।
फलिहमणिगयणवित्थरदुद्धोदहिणो गुरुतरा वि ।।९।।

तो तेहिं दुन्नि विहिया, नियपए सूरिणो भुवणग (म) हिया।
सरला विलसिरचित्ता, समुन्नया दंतिदंत व्व ।।१०।।

सिरि**अम्मएवसूरि** पढमो, तेसिं समस्सिरीभवणं।
गुरुरयणरोहणगिरी, सरस्सईवासवरकमलं ।।११।।

जो **अक्खाणयमणिकोसवित्ति,** वियरणकयत्थकयलोओ।
सव्वोदारजणाणं, चूडारयणत्तमुव्वहइ ।।१२।।

तह बीओ सिरि**सिरिचंदसूरिनामो** मुणीसरो संतो।
संतोसपरो स-परोवयारकरणेक्कमणवित्ती ।।१३।।

सिरि**अम्मएवसूरी**हिं, नियपए सूरिणो कया चउरो।
**हरिभद्रसूरि**नामो सिग्घकई पढमओ तेसिं ।।१४।।

सिरि**विजयसेण**सूरी, बीओ ससितेयकित्तिभरभूरी।
एगंतरोववासी तक्काऽलंकारसमयन्नू ।।१५।।
उद्दामदेसणज्झुणिपडिबोहियसव्वभव्वविसरस्स।
तस्स कणिट्ठो सिरि**नेमिचंदसूरी** वि मंदमई ।।१६।।
ताण तुरिओ **जसदेवसूरि** नामो मुणीसरो मइमं।
लक्खणछंदाऽलंकारतक्कसाहित्तसमयन्नू ।।१७।।
सिरि**विजयसेण** मुणिवइपयम्मि सिरि**नेमिचंदसूरि**हिं।
ठविओ **समंतभद्दा**भिहाणसूरिगुणावासो ।।१८।। *

..................................

तो **अम्मएवमुणिवइ**विणेय**सिरिनेमिचंद**सूरिहिं।
अब्भुदयकरइयं, चरियमिण**मणंतजिणरन्नो** ।।४७।।
संसोहियं च ससमय-परसमयन्नूहिं विउसतिलएहिं।
**जसदेवसूरि**मुणिवइ-**समंतभद्दा**भिहाणेहिं ।।४८।।
पढमायरसे लिहियं **मेहकुमारा**भिहाणविउसेण।
तह पुत्थयंमि गुज्जरवं, सुब्भवचंदुएणमिमं ।।४९।।
रसचंदसूरसंखे वरिसे, **विक्कमनिवा**ओ वड्ढंते।
**वइसाह**सामबारसि, तिहीए वारंमि **सोमस्स** ।।५०।।
रिक्खंमि पुव्वभद्दवयनामगे, इंदजोगजुत्तंमि।
पालंते रज्जसिरिं, **कुमारपाले** महीनाहे ।।५१।।
सिरि**वद्धमाण**पुरट्ठियविसिट्ठ, **चरणगवस**हि पारंभा।
**धवलक्कयंमि** देवयघरंमि, वरिसेण निप्पन्नं ।।५२।।
**पहुपास**पसाएणं, तह सूरिक्कमाणुभावेण।
अंवासन्नेज्झणयकयमेयमि (म) **णंतजिण** चरियं ।।५३।।
पच्चक्खरगणणाए, सिलोयमाणेण बारससहस्सा ।
संपुन्नुच्चिय जाया, चरियंमि **अणंतजिणरन्नो** ।।५४।।
मइमंदत्तेण मए रइय, ता जमिह किं पि उस्सुत्तं।
तं नाउं कयकरुणा, गीयत्था इह विसोहंतु ।।५५।।
जा विजइ रयणायररविससिधरणीसुमेरु तह विंदं।

ता वक्खाणिज्जतं, नंदउ चरियं **अणंतस्स** ।।५६।।

ग्रंथाग्रं १२००० ।।छ।।अनन्तजिनचरितं समाप्तमिति ।।छ।। संवत् १४९७ वर्षे कार्तिक शुदि ४ रवौ मंत्रि कुंपा लेखि ।।छ।। शुभं भवतु ।। कल्याणमस्तु ।।श्री।।...

## समय, अन्यग्रन्थाश्च

श्रीमद्भिः नेमिचन्द्रसूरीश्वरैः १२१६ तमे वैक्रमेऽब्दे 'अनन्तनाथचरितम्' विरचितम्, अतस्तेषां सत्ताकालो द्वादशं त्रयोदशं च शतकम्।

श्रीमद्भिर्निर्मितं 'जीवकुलकम्' अत्रैव २१४ तमे द्वारे निवेशितमस्ति। अन्यच्च, उपदेशमालावृत्तिप्रशस्तितो (प्रशस्तिसङ्ग्रह, पृ.२६), ज्ञायते यत् श्रीमद्भिः द्वे जिनचरिते रचिते आस्ताम्, तयोरेकं 'अनन्तनाथचरितम्' (प्राकृतभाषाबद्धम्, अद्यावधि *अमुद्रितम्) उपलभ्यते, द्वितीयं तु नोपलभ्यते।

### टीकाकारपरिचयः

तत्त्वप्रकाशिनीनाम्न्या अतिविशदस्फुटतमाया वृत्तेर्विधातारः श्रीमन्तः **सिद्धसेन**सूरयश्चन्द्रगच्छमलञ्चक्रुः । गुरुपरम्परा तु श्रीमद्भिरेव वृत्तिप्रान्ते दर्शिता, सा चैवम्-'श्रीचन्द्रगच्छगगने...श्रीमदभयदेवसूरिरविः....तदनु धनेश्वरसूरिः....श्रीमदजित-सिंहसूरि....श्रीवर्धमानसूरि....श्रीचन्द्रप्रभमुनिपतिः....श्रीभद्रेश्वरसूरयः....श्रीमदजित-सिंहसूरिः.....श्रीदेवप्रभसूरिः....श्री सिद्धसेनसूरिः।''

वृत्तिरचनाकालस्तु प्रान्ते एवं दर्शितः- ''करिसागररविसङ्ख्ये (१२४८) श्रीविक्रमनृपतिवत्सरे चैत्रे। पुष्यार्कदिने शुक्लाष्टम्यां वृत्तिः समाप्ताऽसौ''।। [१]''जैनपरम्परानो इतिहास' (भा.२) नाम्नि ग्रन्थे (पृ.२९, पृ.४१७) तु १२७८ तमे वर्षे इति लिखितमस्ति। अत्रेदं ज्ञेयं सागरशब्दः तत्पर्यायाश्च ४-७ द्वयोरङ्कयोरुपयुज्यन्ते (जैनचित्रकल्पद्रुम, पृ.६७-६८)।

जे.सि.प्रत्योस्तु 'कर सागर रवि'....इति पाठः, तदनुसारं 'जेसलमेरुभाण्डा-गारस्थग्रन्थानां नूतना सूचिः' इति पुस्तके (पृ.७२) १२४२ तमं वर्षं दर्शितम्।

१. यद्यपि, देवचन्द्र लालभाई पुस्तकोद्धारफण्डसंस्करणे आगमोद्धारकैः पूज्यपादश्रीमदानन्दसागर-सूरीश्वरलिखितप्रवचनसारोद्धारस्य उपोद्घाते लिखितं यत् ''पूज्यपादविहिताश्चैते ग्रन्था। उपलभ्यन्ते-१ उत्तराध्ययनस्य सुखबोधावृत्तिः, २ श्री महावीरचरित्रम्''....किन्तु, 'अनन्तनाथचरितग्रन्थप्रशस्तितः स्पष्टं ज्ञायते यद् उत्तराध्ययनवृत्यादिकर्तारः श्री नेमिचन्द्रसूरयः प्रवचनसारोद्धारकर्तृभ्यः श्री नेमिचन्द्रसूरिभ्यो भिन्नाः पूर्ववर्त्तिनश्च।'

* अधुनायं ग्रंथो मुद्रितः, तस्य संपादकः रूपेन्द्रकुमार पगारिया विद्यते, प्रकाशनञ्च कृतं अमदावाद-नगरस्थ, लालभाई दलपतभाई विद्यामंदिर संस्थया ई.सं.१९९८।

अतो वृत्तिकारस्य सत्ताकालो वैक्रमीयं त्रयोदशं शतकमिति निश्चीयते।

**अन्यग्रन्थाः**

अत्रैव वृत्तौ वृत्तिकारनिर्मितानामन्येषां त्रयाणां ग्रन्थानामुल्लेखा दृश्यन्ते यथा[१] ''तथा चावोचाम स्तुतिषु....(प्र.अ.१८७ तमं पृ.नं.[२]तथा चाचक्ष्महि श्रीपद्मप्रभचरित्र...(प्र.आ. तमं [४]पत्रम्) [३]अस्मदुपचितसामाचारीनिरीक्षणीया (४ तमं पत्रम्) **नोपलभ्या इदानीमेते ग्रन्थाः।**

**अन्या वृत्तयः :-**

अस्य प्रवचनसारोद्धारग्रन्थरत्नस्यान्या अपि वृत्तय उपलभ्यन्ते। तासां परिचय इत्थम्, (जैन साहित्य का बृहद् इतिहास, भा.४, पृ.१७१ इत्येतद् ग्रन्थस्यानुसारेण)-

१ पूज्यपाद**रविप्रभ**शिष्येण आचार्यो**दयप्रभेण** ३२०३ श्लोकप्रमाणा 'विषमपदव्याख्या' रचिता।

२ अज्ञातकर्तृका ३३०३ श्लोकप्रमाणा 'विषमपदव्याख्या'।

३ अतो भिन्नाप्येकाऽज्ञातकर्तृका वृत्तिः प्राप्यते।

४ **पद्ममन्दिर**गणिविरचितो बालावबोधोऽप्युपलभ्यते।

एताः सर्वा अपि वृत्तयोऽद्यावधि न मुद्रिताः।

'[१]**जैनपरम्परानो इतिहास**' नामकग्रन्थेन ज्ञायते (भा.२, पृ.२८) यत् प्रस्तुततत्त्वज्ञानविकाशिनीवृत्तिकारश्रीसिद्धसेनसूरीश्वराणां गुरुवर्यैः श्रीदेवभद्रसूरिभिरपि प्रवचनसारोद्धारस्य वृत्तिर्निर्मिताऽऽसीत्।

**सम्पादनोपयुक्तहस्तलिखिताः प्रतयः**

(१) जे[१] =

पत्राणि-४३८, आयाम-पृथुत्वे ३२।।x२।।। इंच। द्वितीये पत्रे भगवतो महावीरस्य पारिपार्श्वकसहितं

चित्रमस्ति, ४३६ तमे पत्रे देव्याः चित्रम्, ४३७ तमे पत्रे आचार्यः शिष्येभ्यो वाचनां ददातीति चित्रं चित्रितं वर्तते। त्रीण्यपि चित्राण्यतिसुन्दराणि।

१ यद्यपि, अस्मिन्नेवग्रन्थे एकत्र (पृ.७७१) सं.११४८ अथवा सं.११७८......'इति लिखितमस्ति, किन्तु तद् भ्रान्त्या लिखितं ज्ञायते, यतः रव्यादि सूर्यपर्यायशब्दाङ्का द्वादशात्मकाङ्कमेव सूचयन्ति।

१ आगमप्रभाकरमुनिवर्यश्रीपुण्यविजयमहाराजैः जेसलमेरुस्थानां विविधहस्तप्रतीनां पाठान्तराणि ग्राहीतानि, तासां विवरणं 'जेसलमेरुस्थ ग्रन्थानां नूतना सूची' नामकग्रन्थे उपलभ्यते। तदनुसारेण ज्ञायते यत्तैः श्री जेसलमेरुदुर्गस्थस्य खतरगच्छीययुगप्रधानाचार्यश्रीजिनभद्रसूरिसंस्थापितस्य तालपत्रीयजैनग्रन्थ-भाण्डागारस्थस्य २०६ क्रमाङ्कयुक्तायाः प्रतेरपि पाठान्तराणि ग्राहीतानि।

प्रान्ते लेखनप्रशस्तिरित्थम्-: श्री प्रवचनसारोद्धारवृत्तिः समाप्ता ।।छ।। छ।। छ।। इषु-ग्रह-रविसङ्ख्ये (१२९५) श्री विक्रमनृपतिवत्सरे पौषे शुक्लाष्टम्यां गुरुवारे लिखिताऽसौ प्रतापसिंहेन ।। छ ।। छ ।। मङ्गलं महा श्रीः ।। छ ।। छ।। शिवमस्तु ।। छ ।।

इतोऽग्रे विस्तृता प्रशस्तिर्ग्रन्थस्य लेखयितुर्दत्ताऽस्ति, सा तु जिज्ञासुना 'ग्रन्थानां नूतना सूची' ग्रन्थतः (पृ.७१) द्रष्टव्या ।

तत् पश्चात् गृहीतृप्रशस्तिरित्थम्-संवत् १४८४ वर्षे प्रथमाषाढसुदिदशमी दिने श्रीस्तम्भतीर्थे ठ.विजयसिंहसत्पुत्रेण ठ. बल्लालसुश्रावकेण श्रीप्रवचनसारोद्धारवृत्तिपुस्तकं मूल्येन गृहीतम्।।

(२) ता =

इयं प्रतिः श्रीसङ्घवीपाडा जैन भण्डारसत्का तालपत्रीया प्रतिः (श्रीहेमचन्द्राचार्य-जैनज्ञानमन्दिर, पाटण,) तत्रस्थ सूच्यनुसारेण अस्याः क्रमाङ्कः १५० वर्तते।

पत्राणि १-२६६, (१८४-२६६ पत्रेषु प्रवचनसारोद्धारग्रन्थः मूलमात्रः अस्ति)

दैर्घ्य-पृथुलते १४X१३/४ इञ्च प्रतिपत्रं द्वयोः पार्श्वयोः ५-७ पङ्क्तयः, प्रतिपङ्क्ति प्रायः ७२ अक्षराणि।

(३) पा =

इयं प्रतिः संघवीना पाडानो भंडार सत्का (हेमचन्द्राचार्य जैन ज्ञानमंदिर पाटण) तालपत्रीया अपूर्णा प्रतिः। अस्याः पाठभेदाः प्रायः परिशिष्टे एव दत्ताः सन्ति।

(४) सि=

इयं प्रतिः आचार्यश्रीमद्विजयसिद्धिसूरीश्वरजीशास्त्रसङ्ग्रहसत्का(जैन विद्याशाला, दोशीवाडानी पोल, अमदावाद) । क्रमाङ्कम् ७९६, पत्राणि ३०५, प्रतिपत्रं पङ्क्तयः प्रायः १७, प्रतिपङ्क्ति अक्षराणि प्रायः ५६।

दैर्घ्य-पृथुलते-१ $^{१/४}$X४ $^{१/२}$ इंच

प्रान्ते लेखनप्रशस्तिः- "संवत् १५ आषाढादि ५१ वर्षे आषाढ शुदि १ बुधे श्रीखरतरगच्छे श्रीजिनभद्रसूरीणां विजयराज्ये प्रवचनसारोद्धारवृत्तिर्लिखिता...।"

प्रतिरियं विदुषा संशोधकेन संशोधिता, शुद्धप्राया च कागदपत्रोपरिलिखिता।

---

इयं च पाठान्तरयुता प्रतिः लालभाई दलपतभाई भारतीय संस्कृति विद्या मन्दिर' तः पण्डितवर्याणां दलसुखभाई मालवणिया महाशयानां पं, नगीनभाई अध्यक्ष महोदयानां च सहकारेणास्माभिः प्राप्ता। यद्यपि, अस्यां पाठान्तरयुतायां प्रतौ **जे**, **जे** १, जे २ इत्येवं तिसृणां प्रतीनां पाठान्तराणि दत्तानि सन्ति, तथापि **जे** १ **जे** २ प्रत्योर्विवरणाभावे तयोः पाठान्तराणां च विरलत्वेऽस्माभिः प्रायः **जे**. संज्ञयैव पाठान्तराणि दत्तानि । अस्यामस्माभिरुपयुक्तायां पाठान्तरसहितायां प्रतौ यस्याः पाठान्तराणि सन्ति तस्याः **जे**. संज्ञकायाः प्रतेः परिचयः 'जेसलमेरुस्थग्रन्थानां नूतना सूची' नामकग्रन्थानुसारेणोपरि दत्तः ।

(५) वि=

इयं प्रतिरपि आचार्यश्रीमद्विजयसिद्धिसूरीश्वरजीशास्त्रसङ्ग्रहसत्का (जैन विद्याशाला, दोशीवाडानी पोल, अमदावाद) कागदपत्रोपरिलिखिता। क्रमाङ्कम् ७९५, पत्राणि ३६२,

दैर्घ्य-पृथुलते १०$^{१/४}$X४$^{१/२}$ इंच

ग्रन्थलेखनप्रशस्तिः- ''संवत १५६३ वर्षे उत्तरायने ग्रीष्मऋतौ वैशाखमासे शुक्लपक्षे पूर्णिमायां तिथौ गुरुवासरे श्री स्तंभतीर्थे श्री श्री श्री हेमविमलसूरिराज्ये प.श्रुतसमुद्रगणियोग्यं लिखापितं...''

इयं प्रतिरपि संशोधिता शुद्धप्राया च।

(६) त्रि =

इयं प्रतिरपि आचार्यश्रीमद्विजयसिद्धिसूरीश्वरजीशास्त्रसङ्ग्रहसत्का, कागदपत्रोपरि त्रिपाठपद्धत्या लिखिता।

क्रमाङ्कम् ७९४, पत्राणि ३५०

दैर्घ्यपृथुलते १/४X४$^{१/२}$ इंच

लेखनप्रशस्ति :- ''....।। संवत् १६०८ वर्षे मीती चैत्र सुदी १२ रवौ लिषीतं समाप्तं।।...''

(७) पो =

इयं प्रतिः श्री जैन पोरवाल पंच जैनज्ञानभण्डार सत्का (पाडीव, राजस्थान), कागदपत्रोपरिलिखिता।

क्रमाङ्कम् ४२, पत्राणि ३४५

दैर्घ्य-पृथुलते १०$^{१/४}$X४$^{१/२}$ इंच

लेखनप्रशस्तिः- ''संवत् १६४६ वर्ष भाद्रवा वदि १ गुरुवासरे लिष्यतं।''

(८) सं =

इयं प्रतिः संवेगीउपाश्रयसत्का (हाजापटेलनी पोल, अमदावाद) कागदपत्रोपरिलिखिता।

क्रमाङ्कम् २२०३, पत्राणि ४१९, २२९ क्रमाङ्के द्वे पत्रे विद्येते।

दैर्घ्य-पृथुलते १०१/४X४$^{१/४}$ इंच

लेखनसमयः १६६२ वर्षे अषाढ सुद्ध ९.

(९) वि.प. = (विषमपद.)

प्रतिरियं खम्भातस्थितशान्तिनाथजैनज्ञानभाण्डागारसत्का, तालपत्रीया।

दैर्घ्य-पृथुलते - १७२ इंच।

३२०३ श्लोकप्रमाणात्मकं श्रीउदयप्रभसूरिनिर्मितं विषमपदार्थाववोधाख्यमेतद् टिप्पनकमद्यावधि न प्रकाशितमस्ति। अस्माभिरस्योपयोगो यत्र तत्र टिप्पण्यां (पृ.२५३। टि.२; पृ.२५४। टि.१,२,३,४ इत्यादि) पाठभेदादिनिदर्शनार्थं कृतोऽस्ति।

सं. प्रत्या अस्माभि: पूर्ण उपयोग: कृत:, अन्यासां यथासम्भवमांशिक उपयोग: कृत:।

## प्रस्तुतसम्पादनम्

अत्यन्तोपयोगिनोऽस्य ग्रन्थरत्नस्य मुद्रणं प्राक् जामनगरवास्तव्यै: पं हीरालाल हंसराजमहोदयै: कारापितमासीत्। तत: श्रीमदानन्दसागरसूरिवर्यलिखितोपोद्घात-युक्तमेतदेव ग्रन्थरत्नं देवचन्द्रलालभाईजैनपुस्तकोद्धारसंस्थया प्राकाश्यं नीतम्।

अधुना दुर्लभतरस्यैतस्य ग्रन्थस्य पुन: सम्पादनयुक्तं प्रकाशनमतीवाश्यकमिति मत्वा पूज्यपादपंन्यासप्रवराणां श्रीमतां जयघोषविजयमहाराजानां प्रेरणया भारतीय-प्राच्यतत्त्वप्रकाशनसमितिनिश्रया प्राकाश्यं नीयते, अतस्तेषां श्रुतभक्तिर्भूयोभूयो धन्यवादमर्हति।

## उपकृतिस्मृति:

पूज्यपादशासनप्रभावकाचार्यदेवेशानां श्रीमतां विजय-ओङ्कारसूरीश्वराणां जिनागमतत्त्ववित्पंन्यासप्रवरश्रीमद्जयघोषविजयगणिवराणां च प्रेरणया तेषामाशीर्वाद-पुरस्सरमावाभ्यामेतत्सम्पादनकार्यं प्रारब्धमतस्ते विशेषत उपकारिण:।

मुनिराजश्री भुवनविजयान्तेवासिभिर्दर्शनशास्त्रविशारदैर्मुनिराजश्रीजम्बूविजय-महाराजैरनेकशो मार्गदर्शनप्रदानेन निराकृता अनेका क्षतय उपकृतौ चावाम्।

## धन्यवादार्हा:

सम्पादनकार्योपयोगिहस्तलिखितप्रतयो यासां संस्थानां सन्ति तासां कार्यवाह-कैरेतादृशकार्ये स्वकीयकर्त्तव्यमनुस्मरद्भिरतीवप्रेम्णा ता दत्ता अतस्ते न्यूनधन्यवादार्हा नेति।

सप्रणामं महयावश्चरमतीर्थेशमेतत्सम्पादितकृतिकुसुमेनेत्याऽऽवेदयत:।

पूज्यपादाचार्यदेवेशश्रीमद्विजय**भुवन-**
**भानु**सूरीश्वराणां शिष्यरत्न:
**मुनि: पद्मसेनविजय:**

पूज्यपादाचार्यदेवशश्रीमद्वि**जयभद्रसूरी**-
श्वराणां शिष्यरत्नमुनिराजश्री **जिनचन्द्र**
विजयानां विनेयाणु:
**मुनि: मुनिचन्द्रविजय:**

# आत्मसंरक्षणम्

**-* आचार्यश्रीकल्याणबोधिसूरिः**

न ह्यात्मरक्षणमृते भद्रदर्शनं सम्भवीति धीमता सर्वयत्नेन रक्षणीयोऽयमात्मा। तद्रक्षा च परमार्थवृत्त्या सर्वेन्द्रियसमाधिमात्रेण, यदागमः -

**अप्पा खलु सययं रक्खियव्वो, सव्विंदिएहिं सुसमाहिएहिं । इति (श्रीदशवैकालिकसूत्रे), उक्तश्चान्यत्रापि-**

**आपदां कथितः पन्था, इन्द्रियाणामसंयमः।**
**तज्जयः सम्पदा मार्गो, येनेष्टं तेन गम्यताम्-इति।**

तथाऽप्यकृतबाह्यरक्षाणां साऽपि दुर्लभा अनर्थपात्राणां तद्गन्धस्याप्यभावात्। अत एव परमकारुणिकैरस्मत्पूर्वमहर्षिभिर्बाह्यरक्षासत्कोपाया अपि निगदिताः। आदरगोचरी-कार्याश्चैते इति प्रस्तूयन्ते-

१) बद्धवध्याऽऽश्रये, द्यूतस्थाने, परिभवास्पदे च न गन्तव्यम्।
२) भाण्डागारे, परस्यान्तःपुरे च न यातव्यम्।
३) अमनोज्ञास्पदे, श्मशाने, शून्यस्थाने, चतुष्पदे च तथाविधकारणमन्तरेण न गन्तव्यम्।
४) तुष-शुष्कतृणाऽऽकीर्णे, विषमावकरोषरे न गम्यम्।
५) नदीतीरे चौरवेश्यानटाभिनेत्रीणाञ्चाऽऽस्पदे नैव गन्तव्यम्।
६) कुब्जिकेन, कुमित्रेण, राजदूतेन वा सह गोष्ठी चाकालचर्या च नैव कर्त्तव्या।
७) एकाकिना मार्गे न गन्तव्यम्।
८) एकः सुप्तेषु जनेष्वन्येषु न जागृयात्।
९) एकस्य गच्छतोऽनर्थो मरणं वा सम्भवति।

अत एव वदन्ति तत्त्वज्ञाः-
अकालचर्या विषमा च गोष्ठी, कुमित्रसेवा न कदापि कार्या।
पश्याण्डजं पद्मवने प्रसुप्तं, धनुर्विमुक्तेन शरेण ताडितम्-इति।
भवत्वेतदुपायप्रकराऽऽदृत्य भव्यं भविनामिति शम्। (सन्दर्भः-श्राद्धगुणविवरणग्रन्थः)

* पू.आ.श्री भुवनभानुसूरिसाम्राज्यवर्त्ती।

# आगमस्यामृतम्

-* **आचार्यश्रीकल्याणबोधिसूरिः**

इह हि विश्वेऽपि विश्वेऽनादिकालात् ज्ञानस्य महिमाऽतीव प्रथितः। अत एवोच्यते सुभाषितेऽपि।

**'विद्वत्त्व च नृपत्वं च, नैव तुल्यं कदाचन ।**

**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।'**

इति। इत्थञ्च ज्ञानमेव त्रैलोक्यसर्वस्वमित्यवतरति प्रतिभाससञ्चरम्। ततोऽप्युत्तिष्ठतीयं जिज्ञासा, यत् ज्ञानस्यापि किं सर्वस्वम्? अत्रोत्तरयति जिनागमः-

एयं खु णाणिणो सारं, जं ण हिंसति किंचण।

(परमपावनं द्वितीयाऽऽगमस्वरूपं श्रीसूत्रकृताङ्गसूत्रम्)

एतत् खलु ज्ञानिनः सारभूतम्, तदवाप्तस्य ज्ञानस्यैतदेव सर्वस्वं, यत् ज्ञानिजनः कस्यापि जीवस्य हिंसां न कुर्यात्। न हि परपीडापरिहारव्यतिरिक्तं तात्त्विकं पाण्डित्यमिति निपुणं निभालनीयम्, अत एवार्षम्-'किं ताए पढियाए, पयकोडीए पलालभूयाए? जत्थित्तियं न नायं, परस्स पीडा न कायव्वा-' इति। तत् खलु वास्तवं ज्ञानम्, यत्र सूक्ष्मेतर-सर्वजीवप्रकारावगमः, सर्वभूतात्मभूतनिजात्मसंवित्तिः, सर्वयत्नतः सर्वजीवरक्षाभियोगश्च। एतत्त्रितयविरहितो ह्यज्ञानी भवति, यदि हि ज्ञान्यपि तच्छून्यस्स्यात्, तदा कोऽस्येतरस्मात् प्रतिविशेषो भवेदिति। यतनीयमतोऽहिंसासमग्रतायै, तस्या एव सारसर्वस्वभूतत्वादिति शम्।

---

* पू.आ.श्री भुवनभानुसूरिसाम्राज्यवर्त्ती।

# ऊपधानतपमालारोपणश्लोकः

-*मुनिश्रीधुरंधरविजयः

(उपधानतपमालारोपणावसरे मालामहत्त्वदर्शकः स्रग्धराछन्दोबद्धः हारबन्धश्लोकः)

**[१]मालालीलाविलासः [२]शिवनवयुवते किंलसत् [३]लब्धिलक्ष्म्याः,**
**किं वासौ [४]वासवार्हा [५]विरतिरतिरसप्रापणी [६]पद्मपङ्क्तिः।**
**या [१]लभ्या लब्धलक्ष्यैः [२]सुकृतकृतिकृतौ [३]साङ्कते कम्रकण्ठे,**
**[४]सेवा हेवाकि -[५]वाचंयम-नमन-[६]मतेः (भासतः) [६]शंसतः सर्वसङ्घैः।।१।।**




---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

# चारित्रसप्तविंशिका-४

-मुनिश्री सम्यग्दर्शनविजयगणिः

(शार्दूलविक्रीडितम्)

ऐन्द्राच्र्यं विमलं रमैकनिलयं, चित्सौरभाढ्यं नवम्,
भव्यालीभ्रमरौघसेव्यमनघं, श्रेयस्करं सौख्यकृत्।
सम्यग्दर्शनदायकं गुणनिधिं, श्रीपार्श्वपादाम्बुजम्,
सेवेऽहं प्रतिवासरं परमया, भक्त्याऽस्तु तत् श्रेयसे ।।१।।

(तोटकम्[१])

शुभभावभरं, भवभारहरम्, गुणवल्लिविकाशनवारिधरम्।
शमसौख्यकरं, भवदौःस्थ्यहरम्, चरणं प्रणमामि निवृत्तिकरम् ।।२।।

सुभगं शुभदं, शमदं हितदं, सरसं सकलं, सहजं शिवदम्।
परमं प्रथमं, चरमं प्रशमं, चरणं प्रणमामि निवृत्तिकरम् ।।३।।

ममतातपने, समताजलदम्, मददुष्टभटे, प्रतिमल्लनिभम्।
गुणमौक्तिकदायकशुक्तिसमम्, चरणं प्रणमामि निवृत्तिकरम् ।।४।।

अघमुक्तिकरं, विषयार्त्तिहरं, समतावनितासुखवृद्धिकरम्।
सुखसृष्टिकरं, गुणपुष्टिकरम्, चरणं प्रणमामि निवृत्तिकरम् ।।५।।

---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।
१. द्वादशाक्षरीय जगतीजातौ 'तोटकं'-नामसमवृत्तम्। वर्णन्यासः- ।।ऽ ।।ऽ ।।ऽ ।।ऽ

परमात्मरमावरविष्णुसमम्, जनिचक्रभवाऽखिलपीडहरम्।
सकलाऽऽधिहरञ्च समाधिकरम्, चरणं प्रणमामि निवृत्तिकरम् ॥६॥

([1]द्रुतविलम्बितवृत्तम्)

परमभाग्यसरोरुहभास्करम्, प्रवरसाम्यशिवाप्रियशङ्करम्।
प्रबलमोहघनाघनमारुतं, हितप्रदं चरणं शरणं श्रये ॥७॥

परममङ्गलभावविलासदम्, प्रशमसौधनिवासनिबन्धनम्।
चरमशुद्धिकरं सुगुणालयम्, हितप्रदं चरणं शरणं श्रये ॥८॥

सकलसौख्यनिधाननिकेतनम्, सकलकर्मनिदानविघातकम्।
सकलपुण्यलतालिपयोधरम्, हितप्रदं चरणं शरणं श्रये ॥९॥

सरलतानिलयं, समतामयम्, समितिगुप्तिधरं, भवभीहरम्।
भवतरोर्दहने वरपावकम्, हितप्रदं चरणं शरणं श्रये ॥१०॥

गुणलतावनसिञ्चनवारिदं, निखिलदोषमृगौघमृगेश्वरम्[2]।
शिवसुखावहनैकवरां धरां, हितप्रदं चरणं शरणं श्रये ॥११॥

([3]तामरसवृत्तम्)

शिववनितारतिसौख्यनिवास-मनुभवनिष्ककुटं[4] गुणभासम्।
निजगुणशुद्धिकरं मदवारं, प्रणमत तच्चरणं गुणकारम् ॥१२॥

भवजलतारकपुण्यविधानं-मवगुणवारकशुद्धवितानम्[5]।
शमगुणकारकदिव्यनिधानं, प्रणमत तच्चरणं गुणकारम् ॥१३॥

शिवपथदेशिक[6]शम्बलमुष्णं, भवशितिवारककम्बलरत्नम्।
शिवसुखसाधकशुद्धप्रयत्नं, प्रणमत तच्चरणं गुणकारम् ॥१४॥

---

१. द्वादशाक्षरीय जगतीजातौ 'द्रुतविलम्बित' नामसमवृत्तम् वर्णन्यासः- ।।। ऽ।। ऽ।। ऽ।ऽ) २. सिंहः
३. द्वादशाक्षरीय-जगतीजातौ 'तामरस' नाम समवृत्तम्।कमलविलासिनीत्यन्ये।
वर्णन्यासः-।।। ।ऽ। ।ऽ। ।ऽऽ) ४. सुवर्णकुम्भः ५.चन्दरवो इति भाषायां ६. पथिकः ।

निजगुणप्रापकमुख्यनिदानं, भवभयभञ्जकसाम्यप्रधानम्।
भव[1]प्रतिरोधकनाशनवीरं, प्रणमत तच्चरणं गुणकारम् ।।१५।।

सुखततिसुन्दरसौधमनूनं, शुभमतिपावनमतिशयपुण्यम्[2]।
शिवगतिदायकतीर्थमुदारं, प्रणमत तच्चरणं गुणकारम् ।।१६।।

([3]उपजातिवृत्तम्)

सर्वाणि कार्याणि शुभानि येन, प्रादुर्भवेयुश्च गुणा नवीनाः।
सौख्यश्च सर्वत्र सदा यतः स्यात्, स्तुवे सदा तच्चरणं शरण्यम् ।।१७।।

सर्वेऽपि सत्त्वाः सुखिनो भवन्तु, मा कोपि जीवोऽरतिवेदनः स्यात्।
शुद्धस्वभावादिति सौख्यकृद् यद्, स्तुवे सदा तच्चरणं शरण्यम् ।।१८।।

सौभाग्यमूलं गुणसिन्धुकूलं, दोषाब्धिशोषे च घटोद्भवाभम् ।
संसारवारांनिधिपोतवाहं, स्तुवे सदा तच्चरणं शरण्यम् ।।१९।।

हिंसा-मृषा-चौर्यव्रतं विशाल-मब्रह्म-मूर्च्छाद्यघमुक्तिरूपम्।
चारित्रमेकं त्रिजगद्वरिष्ठं, स्तुवे सदा तच्चरणं शरण्यम् ।।२०।।

मैत्री हिता जीवगणेषु यत्र, रागो न रोषो न भवेत् कदापि।
सच्चित्पदं साम्यप्रदं यदस्ति, स्तुवे सदा तच्चरणं शरण्यम् ।।२१।।

([4]पणववृत्तम्)

मोहं प्लोषति, कुरुते स्वास्थ्यं, प्रीत्यार्द्रां शिवकमलां दत्ते।
भक्त्यार्द्रान् सुखनिकरं धत्ते, प्राणिन्! तत् स्मर चरणं शश्वत् ।।२२।।

सन्मार्गं भववननिस्तारं, संसारं जनिततिविस्तारम्।
दत्ते कृन्तति परिपाट्या यद्, प्राणिन्! तत् स्मर चरणं शश्वत् ।।२३।।

१. चौरः २. पवित्रम् ३. एकादशाक्षरीय-त्रिष्टुब्जातौ 'उपजाति'-नाम समवृतम्। इन्द्रवज्रा-उपेन्द्रवज्रयोः संकर उपजातिः। ।ऽ। ऽऽ। ।ऽ ऽऽ / ऽऽ। ऽऽ। ।ऽ। ऽऽ पञ्च-षडक्षरैः-तुर्य-सप्ताक्षरैर्वा यतिः-विरामः।)
४.दशाक्षरीयपङ्क्तिजातौ 'पणव' नामसमवृत्तम्। वर्णन्यास : ऽऽऽ।।, ।।ऽ ऽऽ पञ्चाक्षरैः यतिः -विरामः।)

स्वर्गं यच्छति ददते मुक्तिं, पापौघं द्यति[१], तनुते कीर्त्तिम्।
कामं विध्यति वृणुते प्रीतिं, प्राणिन्! तत् स्मर चरणं शश्वत् ।।२४।।

ध्यानं [२]शीलति [३]प्रसते ज्ञानं, दौस्थ्यं पीलति व्यथतेऽज्ञानम्।
बुद्धिं [४]मार्गति पवते स्वान्तं, प्राणिन्! तत् स्मर चरणं शश्वत् ।।२५।।

साधोश्चेतसि रमते स्वैरम्, मैत्रीं पोषति [५]कृणुते वैरम्।
सौख्यं पूरति[६] भरते धैर्यम्, प्राणिन्! तत् स्मर चरणं शश्वत् ।।२६।।

([७]स्रग्धरावृत्तम्)

गङ्गास्रोतस्विनीनां, विषमगदहरा, भेषजानां सुधा स्यात्,
रामो भूपेषु वर्य:, नगपतिषु वर:, स्वर्णशैल: विशाल:।
तद्वत् धर्मेषु सारं चरणमतिगुणं, सर्वसौख्यैर्विशिष्टम्,
**'श्रेय:'** सद्**'दर्शना'**र्थं परमसुखकरं, मे सदा स्याद् तदेतद् ।।२७।।

१. छिनत्ति २. अभ्यस्यति ३. प्रसूते ४. शुद्धिं करोति ५. नाशयति ६. पोषति।
७. एकविंशत्यक्षरीयप्रकृतिजातौ 'स्रग्धरा' नाम समवृत्तम्। सप्तभि: सप्तभिरक्षरै: त्रि: विराम:।
वर्णन्यास - ऽऽऽ ऽ।ऽ, ऽ ।। ।।। ।ऽ, ऽ ।ऽऽ ।ऽऽ)

# ग्रन्थपरिचयः

-*मुनिश्री श्रुततिलकविजयः

## ।। सर्वं सत्त्वे प्रतिष्ठितम् ।।

(सत्यहरिश्चन्द्रनाटकस्य परिचयः)

जैननाटकसाहित्यम्

अपरायां साहित्यसृष्टौ जैनाचार्याणां योगदानमनुपमम्। जैनाचार्यैः प्रायः सर्वेषु विषयेषु ग्रन्थान् रचयित्वा स्वस्य विशिष्टप्रतिभायाः परिचयः कारितः। अत्र नाटकविषये यदि चिन्त्येत तर्ह्यपि जैनाचार्याणां योगदानं निश्चयेन विशिष्टम्। जैनाचार्याणां नाटकविषयकं योगदानमियत्ता-गुणवत्तेत्युभयदृष्ट्याऽपि विशिष्टम्। तत्रापि कलिकालसर्वज्ञ-हेमचन्द्राचार्याणां प्रधानशिष्याः श्रीरामचन्द्राचार्यास्तु चूडामणीयन्ते। अधुना संस्कृतनाटकसाहित्ये महाकवेर्भासस्य नाम भारतप्रसिद्धम्। तेन बहूनि नाटकानि रचितानीति मन्यते। 'भासनाटकचक्रम्' इति नाम्ना तस्य कृतीनां सङ्ग्रहः प्रसिद्धः। रामचन्द्राचार्याणां कवनमपि ततोऽप्यधिकम्। भासस्य नाम्ना यानि नाटकानि वर्ण्यन्ते तेषु बहुषु भासस्य कर्तृत्वं तु शङ्कास्पदम्, इतो रामचन्द्राचार्याणां नाटकेषु तेषां कर्तृत्वं तु निःसन्देहं वर्तते। जैननाटकसाहित्ये रामचन्द्राचार्यैः रचितानां सप्तानां नाटकानां मध्ये एकस्य सत्यहरिश्चन्द्रनाम्नो नाटकस्य परिचयोऽत्र दीयते।

**✲ भूमिका :-**

'क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे'

'न हि धर्माधिकारोऽस्ति हीनसत्त्वस्य देहिनः'

'ये सिद्धा ये च सेत्स्यन्ति सर्वे सत्त्वे प्रतिष्ठिताः।<br>
सत्त्वं विना हि सिद्धिर्न प्रोक्ता कुत्रापि शासने।।'

'एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः।<br>
स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न विद्यते।।'

* पू.आचार्यदेवेशश्रीमद्विजयशान्तिचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

'नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता।।'

इत्यादीनि विधानानि यदा यदा कर्णगोचरीभवन्ति तदा तदा सहृदयस्य रोमावलिरङ्कुरिता भवत्येव। जीवनस्य यत् किमपि क्षेत्रं भवेद् साफल्यं यद्यपेक्षितम्, अनिवार्यतया सत्त्वमावश्यकम्। **स्वसिद्धान्तात्, स्वप्रतिज्ञातः प्राणान्तेऽप्यचलनं नाम सत्त्वम्।** प्रस्तुता कृतिरस्मानेतदेव बोधयति यज्जीवने तादृशः कोऽपि लघुरपि सुसिद्धान्तः मनसि स्थिरीकरणीयो यस्य पालनाय महत्यपि सङ्कटे वयं प्रतिबद्धा भवेम। लघोरपि सुसिद्धान्तस्यैतादृशमनुसरणमग्र उत्तमोत्तमां स्थितिमर्पयेदेव। किन्त्वेतादृशायानुसरणा-यावश्यकं किम्? -सत्त्वम्। ईदृशस्य सत्त्वस्य जाज्वल्यमानं दृष्टान्तमत्र नाट्यरूपेण ग्रथितं सूरिपुङ्गवैः रामचन्द्राचार्यैः।

अधुना कृतिसारं विलोकयामः। **नाटकसारः :-**

नाटकस्य प्रस्तावनायामेव नाट्यकाराः स्वीयं परिचयं ददति यद् 'रामस्य वाचां रसः परम्' अर्थात् रामचन्द्रस्य कृतिषु रस उत्कृष्टः। स्वयमेव ग्रन्थकृद्भिः स्वस्य **नाट्यदर्पणे** रसविषये दृढं स्वारस्यं दर्शितमेव। तदनुरूपा एव तेषां कृतय इत्यत्र नास्ति संशयलेशोऽपि। नाटकस्य विषयानुरूप आमूखे सूत्रधारो वदति यद् सत्त्वैकतानवृत्तीनां जनानामुपरि देवोऽपि न प्रभविष्णुः। इममेव श्लोकं वदतो हरिश्चन्द्रस्य प्रवेशेन सह नाट्यारम्भो भवति।

**प्रथमोऽङ्कः :-**

कपिञ्जलकुन्तलाभ्यां सहाश्रमविघ्नकारिवराहव्यापादनाय राजा निष्क्रान्तः। शरप्रयोगेन च वराहव्यापादनं सञ्जातम्। अत्राल्पाल्पैः श्लोकैः सहजतया कविना निसर्गवर्णनं कृतम्। ततो राजा स्वीयेन बाणेन को मारित इति पश्यति। तत्र वराहातिरिक्तां निरपराधां गर्भिणीं हरिणीं मारितां दृष्ट्वा राज्ञो हृदये तीव्र आघातो भवति। स च मुनिदर्शनायोत्सुको भवति। क्रमशो मुनीनामाश्रमे गच्छति। अत्र कुलपत्यङ्गारमुखयोः प्रारम्भिकेण संवादेन ज्ञायते यद् मुनिरूपिणौ तौ देवाविन्द्रकृतप्रशंसाश्रवणेन हरिश्चन्द्रस्य सत्त्वपरिक्षार्थमागतौ। राजा कुलपतये कुशलपृच्छां करोति, तदैव कुलपतिपुत्री वञ्चना कुलपतिसहधर्मचारिणी निकृतिश्च विलापन्त्यावागच्छतः। हरिणीमरणजन्यशोकेन वञ्चनाऽनशनेच्छां प्रदर्शयति। कुलपतिर्यदा जानाति यद् राज्ञैव हरिणी मारिता, तदा स क्रोधाविष्टो यमरूपः सञ्जातः। अत्र रौद्ररसो मूर्तिमान् दृश्यते कुलपतौ। क्रमशो राजा कुलपते राज्यदानं करोति। पुनरपि हरिण्या अग्निसंस्कारसमये वञ्चनाऽप्यात्मानं दाहयितुमिच्छति। राजा तस्यै कनकलक्षदानस्य प्रतिज्ञां करोति। अत्र प्रथमोऽङ्कः पूर्णीभवति।

**द्वितीयोऽङ्कः :-**

राजाऽऽस्थान्यामुपविष्टस्तदाऽमात्यो वसुभूतिरागत्य ह्यस्तनदिनवृत्तान्तविषये

पृच्छति यद् राज्यदानमुचितं किम्? राजा कथयति 'उचितमुतानुचितमित्यादौ चिन्तनीयम्। प्रतिज्ञातस्य निर्वहणमेव श्रेयः।' कुलपतिरागत्य कनकलक्षं निष्ठुररीत्या याचते। राज्ञो भिन्नभिन्नान् प्रयत्नान् विफलीकुर्वन् स राजानम् कथयति-मासाभ्यन्तरे किं याचित्वा सुवर्णं दास्यसि? तदाः राज्ञः सत्त्वं हुङ्कारं करोति- 'त्रैशङ्कवाः भिक्षां दातुं शिक्षिता, न ग्रहीतुम्।' अत्रान्तरे वसुभूतिः कुन्तलश्च कुलपतेः शापेन क्रमशः शुकः शृगालश्च भवतः। अन्ते सुतारा-रोहिताश्वाभ्यां सह राज्ञो नगरत्यागस्य हृदयकम्पकेन वर्णनेन सह द्वितीयोऽङ्कः संपूर्णः।

**तृतीयोऽङ्कः :-**

राजा राज्ञी पुत्रश्चाविरतपादचारेण वाराणसीबहिरागच्छन्ति। रोहिताश्वस्य क्षुधावेदनादेः वर्णनं करुणरसं पोषयति। राज्ञो धैर्यं तत्रापि पत्नीपुत्रयोराश्वासनं ददाति। क्रमशश्चैकः सम्राट् चक्रवर्तिलक्षणसंपन्नः राजा स्वीयप्रतिज्ञानिर्वहणाय पत्नीपुत्रयोः द्विजगृहे दासत्वेन विक्रयणं करोति!! अत्र पुनरपि कुलपतिरागत्य वदति-प्रार्थय चन्द्रशेखरभूपतिं येनैकहेलया सुवर्णप्राप्तिः स्याद्। हरिश्चन्द्रस्य सत्त्वं टङ्कारयति- 'हरिश्चन्द्रः खल्वहं, न नाम शतशः पराभूतान् प्रत्यर्थिनः प्राणात्ययेऽपि प्रार्थये।' अन्ततो गत्वा हरिश्चन्द्रो निषादस्य कर्मकरत्वं स्वीकुरुतेऽत्र तृतीयोऽङ्कः पूर्णः।

**चतुर्थोऽङ्कः :-**

वाराणस्यां मारिः प्रसृतः। जना अक्षिनिमीलनमिव म्रियन्ते। राजा चन्द्रशेखर एतदुपद्रवनिवारणायामात्यसत्यवसुना सह विमर्शं कृत्वा मान्त्रिकमाह्वयति। मान्त्रिको मन्त्रप्रपञ्चेन राक्षसीरूपेण सुतारामाकृष्यानयति। तस्याः शिक्षार्थं चण्डालमाकारयति। अत्रान्तर एकः शुकः राज्ञः पार्श्वं आनीयतेऽमात्येन। सर्वविद्याविशारदः स शुकः वचनरचनयोपस्थितान् सर्वान् प्रसन्नीकरोति। चण्डालश्चण्डालवेषेण हरिश्चन्द्रेण सहागच्छति शुकस्तं प्रत्यभिज्ञाय यथायथमुपस्तौति। किन्तु हरिश्चन्द्र आत्मानं न प्रकाशयति। राजा राक्षसीरूपां सुतारां गर्दभ आरोह्य निर्वासनाय चण्डालस्याज्ञां ददाति। शुकः पुनः पुनः निषेधं करोति। अन्ते, स सुतारायाः सतीत्वसत्यापनायाग्निप्रवेशं करोत्यखण्डितजीवितश्च बहिरागच्छति चतुर्थाङ्कस्य पूर्णतात्र।

**पञ्चमोऽङ्कः :-**

हरिश्चन्द्रस्य परोपकारभावनायाः पराकाष्ठात्र निरूपिता। आत्मनः प्रत्यर्थिभूपतेः पुत्रः कयाचिद् विद्याधर्यापहृत्य होमायोपस्थापितः। हरिश्चन्द्र आग्रहं कृत्वा तं मोचयति। तस्य स्थाने आत्मानं च बध्नाति। विद्याधर्यै होमाय स्वमांसखण्डानि स्वयं कृत्त्वार्पयति। क्रमशो विद्याधर्या अभीष्टा विद्यासिद्धिः निकटीभवति। अत्रान्तरे शृगालरूपेण कुन्तलेन कृतस्य

ध्वने: कारणत: एकस्तापस उपस्थितवान्। स च क्रोधेन होमभङ्गं कृतवान्। तेन भीता विद्याधरी पलायिता। स च तापसो हरिश्चन्द्रेण यदा मही दत्ता तदा कुलपतिना साक्षीकृत आसीत्। अत: कुलपते सुवर्णहानि: मा भूदिति कृत्वा स संरोहिण्यौषध्या हरिश्चन्द्रं निर्व्रणं कारितवान्, पूर्णोऽत्र पञ्चमोङ्क:।

**षष्ठोऽङ्क: :-**

रोहिताश्वस्य हृदयभेदकं मरणं हरिश्चन्द्रस्य रोमाञ्चोत्पादकं सत्त्वं च पाठकान् भावार्द्रान् करोति, अत्र निर्वहणसन्धिरूपे षष्ठेऽङ्के स्मशाने सुतारा सर्पदंशेन मृतस्य पुत्रस्य वस्त्राच्छादितं कलेवरं गृहीत्वाऽऽगच्छति। हरिश्चन्द्रो यदा जानाति, तदा तीव्रमाघातं तु यद्यप्यनुभवति, तथाप्यन्ते सत्त्वस्यैव विजयो भवति। स शब्दश: वस्त्रयाचनां करोति सुताराया: पुरत:, तदा एव......'अद्भुतान्तं रसोर्मिभि:' नाटकं भिन्नभिन्नानां रसानाम् उर्मिभि: सहितमन्तेऽद्भुतरसमयमुचितमिति नियमानुरूपं पुष्पवृष्टिपूर्वकं चन्द्रचूडकुन्द-प्रभदेवयोरागमनं भवति। तौ सर्वां मायां दूरीकुरुत:। हरिश्चन्द्रस्य निर्व्याजं प्रशंसां कृत्वा। तावात्मस्वरूपं कथयत:। शक्रावतारचैत्ये हरिश्चन्द्रस्य मस्तकार्पणपर्यन्तं सत्त्वं यत: प्रभृतीन्द्रेण दृष्टं, तत:प्रभृति स हरिश्चन्द्रस्य सत्त्वप्रशंसां न जहाति स्म। तां श्रुत्वा तत्परीक्षार्थमावामागताविति कथयित्वा क्षमयित्वा च तावन्ते हरिश्चन्द्राय वरं याचितुं वदत:। सत्त्वैकनिधे: हरिश्चन्द्रस्योत्तरम्-'नाहं प्रलयेऽपि परप्रणयदैन्यमावहामि।' षष्ठाङ्केन सह नाटकमत्र समाप्तम्।

**❋ नाटक वैशिष्ट्यम् :-**

अस्या: कृते: विषये प्रसिद्ध आलङ्कारिक: डो. तपस्वी नान्दीवर्य: स्वीये गूर्जरभाषायां लिखिते 'संस्कृतनाटकानां परिचय' नाम्नि (संस्कृतनाटकानां परिचय:) पुस्तके निरूपयति-'सत्यहरिश्चन्द्रस्य पाठकानां स्वयमेव नाट्यकारस्य सिद्धय: स्पष्टा भविष्यन्ति। अस्या: कृते: स्वाभाविकत्वं काश्चन प्रसिद्धा: कृतय: स्मारयति। कविताया नाटकस्य च सुभगं संयोजनम्। गूर्जरराष्ट्रवर्त्तिन एकस्य विदुष एषा कृति: समस्तभारतवर्षस्य कृते गौरवार्हा। नाटकस्य शैल्यां प्रासादिकत्वं 'माधुर्यं' निराडम्बरत्वञ्च च तादृशमुत्तमोत्तमं यद् स्वयमेवास्माकं भासस्य शूद्रकस्य च नामनी स्मरणपथ आगच्छेताम्।' इत्याद्यपि च नाट्यकारेणैव स्वोपज्ञे नाट्यदर्पण उदाहरणरूपेण द्वादशवारमस्य नाटकस्योल्लेख: कृत:। विस्तरेण वैशिष्ट्यनिरूपणायात्रावकाशो न भवेदिति तु सहजमत: पाठकेभ्यो नम्रा विज्ञप्ति: यत् कृते: पठनेनैव रसानुभव: कर्त्तव्य:।

प्रान्ते, एतादृशानि नाटकानि पठित्वा वयं जीवने सत्त्वं संप्राप्य, तत्प्रभावेण सिद्धिं प्राप्नुयामेत्येष एक एव शुभाभिलाष:।

# संवेगरस-रसायनम्

-*मुनिश्री रैवतचंद्रविजयः

यथा सागरतरङ्गा उच्छलन्तो मीनानां हृदयमाह्लादयन्ति, तथैव गुरूणामुपास्तिः सज्जनानां हृदयमाह्लादयति। पूर्वकाले यदाऽऽधुनिकसाधनानामाविष्करणं नाभवत्, तदा लोका अपि व्यवहारादिषु कुशलीभवन्तः स्वजीवनं व्यत्ययुः। किन्त्वधुना समय आधुनिकसाधनानां प्रयोगोऽत्यधिको जातः, ततश्च मानवजीवनेऽतिहानयः सञ्जाताः।

यथा दिवाकरः करैस्तमिस्रं विनाशयति, तथैव मनुष्यः सद्गुरुयोगेन स्वाज्ञानं विनाशयति, ततश्च कल्याणमधिगच्छति। मनुष्याणाश्चित्ते स्थितं मोहान्धकारं विनाशयितुं सद्गुरूवो भानुकरा भवन्ति।

यथा जीवस्यास्मिन् जगत्यनादिकालात् परिभ्रमणं वर्तते, तथैव सद्गुरूणां योगोऽपि वर्तत एव। ये सद्गुरुनिवसनमङ्गीकुर्वन्ति त एव सन्मार्गे प्रवर्तमाना मोक्षमधिगच्छन्ति।

वर्तमानकाले भिन्नभिन्नपन्थानो गच्छाश्च दृश्यन्ते। अत एव सद्गुरुयोगो न सुलभः। त एव सत्यमार्गप्रकाशकाः सन्ति। तेषाञ्चाभावे यथान्धकारे पतितस्य वस्तुन आलोकनं दुष्करं भवति, तथैव सद्गुरूणामभावे सन्मार्गालोकनमपि दुष्करमेव। तेषामभावे निर्मलज्ञानदर्शनचारित्राणामाराधनाऽपि दुष्करा एव जायते। यथा दीपके सति वस्तुनो विलोकनं सुलभं भवति तथैव सति सद्गुरौ मोक्षमार्गः सुलभतरः। अत एव भव्यजीवानां विबोधनाय सद्गुरूणां सान्निध्यं नितान्तमवश्यमेव भवति। तेषां सान्निध्येन जीवः कुमार्गं त्यक्त्वा मोक्षमार्गेऽग्रेसरो भवति। अत एव तेषामुपकारित्वं सर्वैर्विदितमेवास्ति।

यथा सूर्यस्याभावे पदार्थानां दर्शनं दुर्लभं भवति, तथैव सद्गुरूणामभावेऽपि तत्त्व-प्राप्तिर्दुर्लभा भवति। यथा रत्नवणिजो रत्नानि प्राप्य हृष्यन्ति, तथैव गुरुमुखात् तत्त्वानि श्रुत्वा

* मुनिरयं त्रिस्तुतिकगच्छवर्त्ती।

भव्याः हृष्यन्ति। यथा कुबोधं निरस्य भव्याः सद्बोधं प्राप्नुवन्ति, तदा तेषामानन्दानुभूतिर्जायते। अत एव गुरूणाम् मुखात् शास्त्रश्रवणं नितान्तमेवावश्यकं भवति।

यथा यथा गुरुमुखात् तत्त्वश्रुति र्जायते तथा तथा तेषां प्रति हार्दिकप्रीतिभावो वर्धते। तेषां सम्पर्कात् सद्भावो विकसति। अतः संमदपूर्वकं समर्पणात् प्रीतिकरणाच्च स्वयोग्यं गुणस्थानकमध्यारुह्य परमतोषं पुष्णाति। अत एव गुरुं प्रति हार्दिकप्रीतिभावना नितान्तमावश्यिकी भवति।

आत्मार्थिने जनाय स्वलक्ष्यनिर्धारणाऽप्यतीवोपयोगिनी भवति। अस्या अभावे स्वगन्तव्यस्थाननिर्णयः कर्तुमशक्यत्वात्। अत एवात्मार्थिभिः साऽवश्यं हि करणीया भवति। स्वेष्टस्थानप्राप्तिः सर्वेषामानन्दाय भवति, तदभावे च कार्यनिष्फलतयेष्टस्थानप्राप्तिः दुर्लभैव जायते। अत एव सन्मार्गप्रवृत्तेर्दुर्लभतया मोक्षमार्गोऽपि दुर्लभो जायते। ततस्तन्निर्धारणाऽपि नितान्तमावश्यिकी वर्तते।

गुरुकृपा एव विशिष्टपदार्थः, यां प्राप्तुं शिष्याः प्रयत्नशीला भवन्ति। साऽनुभव-सिद्धरसायनमस्ति, यां पीत्वा शिष्याः नष्टमोहविषा भवन्ति। गुरुकृपां विना कोऽपि निर्वाणं न प्राप्नोति, अत एव शिष्यास्तस्याः प्राप्त्यै संमुखिनो भवन्ति। शिष्येभ्यः सा एव चिन्तामणिसमा वर्तते। गुरुकृपया शिष्या मोहं विनाश्य शीघ्रतया स्वगन्तव्यस्थानं निर्वाणं प्राप्नुवन्ति। अत एव शिष्याणामुन्नत्यां गुरुकृपा महत्पात्रतां भजते।

गुरुकृपां विना शिष्याणां प्रगतिः, दुःशक्या वर्तते। सत्प्रवृत्यां विघ्नविजयस्य दुःशक्यत्वात्, अत एव शिष्येभ्यः सैवादरणीया भवति। अत एव प्रवृत्तानां शिष्याणां सैव हिताय भवति। अत एव मोक्षमार्गे प्रस्थितानां शिष्याणां तस्याः महत्याकाङ्क्षा वर्तते।

शिष्यगणोऽपि सहर्षं गुरोराज्ञामुररीकृत्य स्वश्रेयोऽधिगच्छति। अत एव गुरुकृपां विना शिष्यसमुदायस्य प्रयत्न आत्माभिमुखो न भवति। यथा लब्धं रत्नं सुपरीक्ष्य रत्नवणिजो गृह्णन्ति, तथैव शिष्यं सुपरीक्ष्यं सुगुरुर्गृह्णत्यनुगृह्णाति च। यथा जना रत्नानि मूल्येन क्रीणन्ति, तथैव सुगुरुः सुयोग्यतया मुमुक्षून् शिष्यत्वेन स्वीकुरुते तथा तेषामुन्नत्यै प्रयतते। तेषां प्रगत्यै जागरुकः सन् विविधभाषाकाव्यसाहित्यादिपाठनेन हृदयङ्गमवचनेन च हृदयं तुष्यन् मधुरालापेन च रञ्जयन् चमत्कारश्चोत्पादयति।

यथा गीतवाजिंत्रनृत्यादिसहितेन मनोहरनाटकेनाभिनयकारका जनानाम् हृदयमाकर्षन्ति तथैव विविधकाव्यसाहित्यभाषादिचर्चया शिष्याणां हृदयमावर्जयन्ति ते सद्गुरवः। शास्त्रेऽनेकप्रकारा गुरवो निर्दिष्टाः, ते च शिष्याणामुन्नत्यै सहायकर्तारो भवन्ति। तेषां विना शिष्याणामाध्यात्मिकगतिः सफला न भवति। अत एव तेषां कुशलनेतृत्वं सहायकं भवति।

यथा मुक्ताफलानि तन्तुना ग्रथितानि सन्ति मालाशोभां वहन्ति तथैव सुगुरुणा सुपाठिता: शिष्या: सुशिष्यत्वशोभां वहन्ति। जगति गुरूणामेव महत्प्रभावो विलोक्यते, येन स्वत: शिष्या गुरुसमीपमागच्छन्ति। यथा जना भूगतं निधिं प्राप्य हृष्यन्ति, यथा दृष्टिं प्राप्यान्धो मोदते, तथैव शिष्या: सुगुरुं प्राप्य तुष्यन्ति। लोके गुरो: प्रभावोऽधिको वर्तते येन शिष्या: स्वात्मकल्याणमधिगन्तुं प्रभवन्ति।

यथा दिपकोऽङ्धकारे तम: दूरीकृत्य पदार्थं प्रकाशते, तथा गुरुरपि शिष्याणां संशयान्धकारं छित्वा तत्त्वप्रकाशं करोति। गुरोरादेशं परिपाल्य शिष्या: स्वहिताय प्रयतन्ते। यथा सागरस्थितानि रत्नानि समधिगत्य विक्रीय च रत्नवणिजो बहुलाभं प्राप्नुवन्ति, तथैव सद्गुरुसागरात् ज्ञानरत्नानि प्राप्य शिष्या: परस्मै उपकारका भवन्ति, ज्ञानतत्वानि च प्राप्य शिष्या उचिताचरणेन मोक्षमधिगमनार्हा भवन्ति।

गुरुकृपया शिष्या: शीघ्रतया स्वेष्टस्थानं प्राप्नुवन्ति। गुरुन् विना कोऽपि कदापि मोक्षं न प्राप्नोति। गुरूणां सहायात् शिष्यास्तत्वानि विदित्वा ज्ञानवन्तो भवन्ति, ज्ञानरज्जो: सहायतया शिष्या भवान्धकूपात् बहि: निस्सरन्ति । यथा दिवाकर: किरणैस्तमो निरस्य पदार्थनामालोकनं कारयति, तथैव गुरुरपि शिष्येभ्यस्तत्त्वोपदेशैरात्मप्रकाशं कारयति। यतो गुरव: शिष्याणां ज्ञाननयनान्युद्घाटयन्ति, ततस्तेषामुज्जवलता सूर्यादप्यतिशायिनी वर्तते। गुरुकथितमार्गेण प्रयाणं कुर्वन्त: शिष्यगणा: स्वेष्टस्थानं सुखेन समधिगच्छन्ति।

यथा कमलानि नयनोत्सवाय भवन्ति, यथा च चन्द्रस्तापं हरति, तथैव सद्गुरुदर्शितमार्ग: शिष्याणां समुत्कर्षाय हर्षाय च भवति। सन्मार्गे प्रस्थानेन शिष्याणां स्वेष्टस्थानप्राप्ति र्भवति, उचितप्रवृत्या च ते शीघ्रतया मोक्षमधिगच्छन्ति।

कषायप्राबल्ययोगात् जीवानां विविधाध्यवसायस्थानानि भवन्ति। मार्गे प्रवृत्तजीवानां कषायजय: सुलभो भवति। तस्मिन् जिते च जीवानामूर्ध्वगमनं सुकरं जायते। अत एवोचितमार्गप्रवृत्तानां शिष्याणामाचारपालनं भृशमनुमोदनीयं भवति। यथा यथा शिष्या आचारपालने दक्षा भवन्ति तथा तथा तेषामेवं सर्वोच्चाध्यात्मिकशिखरस्थानानि स्वायत्तानि भवन्ति।

यथा तैलपूरणं विना दीपको न प्रज्वलति, तथैवोचितक्रियां विना ज्ञानिनोप्युच्चस्थानानि नाध्यारोहन्ति। उचितक्रियापालने दक्षा: शिष्या: शीघ्रतया स्वोचितोच्चशिखरस्थानान्यध्यारोहन्ति, क्रमशश्च निर्वाणमपि प्राप्नुवन्ति। यथैव दीपकोऽन्धकारस्य विघटनेन पदार्थस्य प्रकाशनञ्च करोति, तथैव सुशिष्या: स्वज्ञानप्रकाशेन लोकानामज्ञानतमश्छित्वा परमं कल्याणमपि कुर्वन्ति।

जिनशासने तु क्रियाकलापा विशिष्टा वर्तन्ते। यथाऽनेकव्यापारेषु दक्षा व्यापारिणो

धनार्जनं कुर्वन्ति, तथैव स्वोचितक्रियापालनेन शिष्या अपि स्वश्रेयोऽधिगच्छन्ति। यथा सूर्यस्तेजसाधिको वर्तते, यथा च रत्नं स्वकान्त्या विशिष्टं भवति, तथैव शिष्या अप्युचितक्रियाकलापेनाऽधिकं विशिष्टतरा भवन्ति। उचितक्रियाऽऽचरणं विना उच्च शिखरस्थानाऽऽरोहणं सुकरं नैव भवति।

जिनशासने चाचारप्ररुपका ग्रन्था अनेका विद्यन्ते। तेषु च चरणकरणानुयोगग्रन्थेषु प्रतिपादिताचारपालनेन शिष्याः प्रवर्तन्ते। ते च ग्रन्थाश्चारित्रपालने विशिष्टसहायका भवन्ति। अत एव तेषामभ्यासोऽत्यावश्यको वर्तते। शिष्याश्च सूत्रप्रतिपादिताचारनिर्देशमनुसरन्ति। दिनक्रियाश्च तेषु प्रतिपादिताः। यथा हि जिनशासने चारित्रस्य पालनं पूर्वकाले सुकरमासीत्, तन्न ह्यधुना समये वर्तते, यतो ह्यवसर्पिणीकालप्रभावोऽयम्। वर्तेते चाधुनापि भरतक्षेत्रे बकुशकुशीले चारित्रे।

गुरुसहायाच्चारित्रस्य पालनं सुकरं जायते। यथा कोविदा राज्ञश्चित्तरञ्जनं कुर्वन्ति, तथैव शिष्या गुरोर्हृदयं रञ्जयन्ति। नीतिशास्त्रे वर्णिताः सुगुरुलक्षणसहिता एव गुरवो वन्दनीया भवन्ति। गुरोः परिचर्ययाऽधिगतानि तत्वानि सुरक्षितानि भवन्ति। मिथ्यात्वमार्गादिदलने सुगुरवः सहायका भवन्ति। अत एव सुगुरोः स्थानं जिनशासने सर्वोच्चं वर्तते।

ये शिष्याः सुगुरूनाश्रयन्ते, तेषामेवोन्नतिर्जायते। गुरून् विना शिष्याणां भ्रान्त्यपि जायते, अत एव शिष्याणां गुरोः निश्राया आवश्यकता भवति। शिष्या अपि गुरोर्निश्रायां पठनपाठनादिषु तथाऽन्याचारपालनक्रियासु दक्षीभूय स्वौचित्याचरणं प्राप्नुवन्ति। अतो गच्छाचार एव सद्भिः प्रशस्यते। विनयं विना शिष्या ज्ञानिनो न जायन्ते। यतो धर्मस्य मूलं विनयः कथितः। आचारोऽपि च शिष्याणां प्रथमो धर्मो वर्तते। ये शिष्या जागरुकाः सन्तः गुरूणां परिचर्यां कुर्वन्ति, गुरवस्तेषामुपरि तुष्यन्ति। अद्यापि जैनशासने लोकैः जंबूस्वामि-प्रभवस्वामिस्थूलभद्रवज्रस्वामिप्रमुखाः शिष्याः प्रशस्यन्ते। गुरुकृपया शिष्याः केवलीभूय मोक्षसुखमधिगच्छन्ति।

यथा तारागणानां मध्यस्थितश्चन्द्रो विराजते, तथैव शिष्याणां मध्ये स्थिता गुरवो विराजन्ते। यथाऽकाशाङ्गने सूर्यः स्वप्रतापेन प्रकाशते, तथैव गुरवः स्वगरिम्णाऽस्मिन् भूतले शोभन्ते। यथा कासारस्य मध्ये स्थितानि कमलानि सूर्यकिरणैः विकसन्ति, तथैव गुरुदर्शनेन शिष्याणां हृदयानि विकसन्ति। यथा मेघागमेन मयूरा नृत्यन्ति, तथैव गुर्वालोकनेन शिष्याः प्रमोदन्ते।

# हेमार्हद्देशनासारस्तवः

-*मुनिश्रीज्ञानभूषणविजयः

श्रिताईतां श्रीश्चरणाम्बुजाते, नष्टाघनैर्मल्यभवाऽमला या।
दिव्या गिरो धर्मकिरः सभायां, भव्येष्वघाऽन्धेषु जिनार्कभासः ।।१।।

मार्गदेष्टृन् गुरुन् नत्वा, जिनानां देशनाभया । त्रिषष्टिपर्वकाव्यस्थ-देशनातोऽर्हतः स्तुवे ।।२।।

**रत्नत्रयीकीर्तनेन नाभिनन्दनस्तुतिः-**
'ज्ञानादिरेव मोक्षस्य, प्रधानं कारणं मतम्' । इत्याद्यदेशनादाता, पातु श्रीनाभिन्दनः ।।३।।

**ध्यानमहिम्ना अजितप्रभुस्तुतिः-**
'शुभाशुभमिति ध्यानं, सद्गति दुर्गतिप्रदम्'। इत्याद्यदेशना पातु, दुर्ध्यानादजितप्रभोः ।।४।।

**अनित्यभावनया संभवविभुस्तुतिः-**
'क्षणं जातं क्षणं नष्टं, स्वभावोऽयं भवस्य तु' इत्याद्यदेशनादाता, संभवः शं ददातु नः ।।५।।

**अशरणभावनया जिनाऽभिनन्दनस्तुतिः-**
'विना धर्मं भवव्याधे - र्मुक्त्यै न कोप्यलं भवेत्' । इत्याद्यदेशनादाता, नन्दतादभिनन्दनः ।।६।।

**एकत्वभावनया सुमतियतिपतिस्तुतिः-**
'जायते ह्येक एवात्मा, मृतिं याति स एव हि' इत्याद्यदेशना-दातः!, सुमते! सुमतिंकुरु ।।७।।

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

**संसारभावनया पद्मप्रभप्रभुस्तुतिः-**

'असारोऽयं हि संसारो, मोहादिधूर्तवञ्चनैः'। इत्याद्यदेशनादाता, पद्मप्रभः पुनातु नः ।।८।।

**अन्यत्वभावनया सुपार्श्वदेवस्तुतिः-**

'नेदं तवेति रे मत्त!, ममेति ब्रूहि मा परम्' । इत्याद्यदेशनादातः!, सुपार्श्व! मां समुद्धर ।।९।।

**अशुचिभावनया चन्द्रप्रभजिनस्तुतिः-**

'अन्तोऽशुचि वपुरेतन्न स्याच्छुचि कदाचन'। इत्याद्यदेशनादाता, चन्द्रप्रभः पुनातु मे ।।१०।।

**आश्रवभावनया सुविधिस्वामिस्तुतिः-**

'संसारस्याश्रवाद् वृद्धि-र्नाशश्च संवराद् वरात्' । इत्याद्यवाणि! सुविधेः, सुस्थिरा भव मे हृदि ।।११।।

**संवरभावनया शीतलनाथस्तुतिः-**

'संवरो निर्वृते-र्मार्गस्, तन्मार्गे यात यत्नतः' । इत्याद्यदेशनादाता, शीतलः शीतलं कुरु ।।१२।।

**निर्जराभावनया श्रेयांसजिनस्तुतिः-**

'क्षरन्ति सर्वकर्माणि, तदात्मा मोक्षमक्षति'। इत्याद्यदेशनादाता, श्रेयांसः श्रेयसेऽस्तु वः।।१३।।

**धर्मस्वाख्यातभावनया वासुपूज्यप्रभुस्तुतिः-**

'सिच्यते भववृक्षोऽयं, रागद्वेषादिभिर्जलैः'। रागिद्वेषिभिरुक्तश्च, धर्मस्तमेव पुष्यति ।।१४।।

'जिनधर्मो भवच्छेदीति प्रख्यातिर्हि तं श्रय' । इत्याद्यदेशनादानाद् वासुपूज्यःपुनातु मे ।।१५।।
(युग्मम्)

**बोधिदुर्लभभावनया विमलविभुवरस्तुतिः-**

'कराद् ग्रहः समीरस्य, राधावेधोऽन्धतो यथा'। तथा नृणां तु सद्बोधिः, परत्रेहातिदुर्लभः।।१६।।
बोधेर्यदात्मसौख्यं स्यात्, तत्तुला नैव केनचित्। [1]इत्याद्यदेशनाबोधि-र्विमलो विमलार्हतः।।१७।।
(युग्मम्)

**सप्ततत्त्वदेशकत्वेन अनन्ततीर्थकृत्स्तुतिः-**

'जीवादिसप्ततत्वानां, सत् स्वरुपं प्रकाशितम्' । येनाद्यदेशनामध्येऽनन्तोऽनन्तसुखं कुरु ।।१८।।

---

१. इति-आद्य-देशना एव बोधिः यस्य सः,= इत्याद्यदेशनाबोधिः

**कषायस्वरुपज्ञापकत्वेन धर्मजिनस्तुतिः-**

'कषायोऽयं महाऽधर्मो, धर्मः स्यान्निष्कषायता' इत्याद्यदेशनादाता, धर्मो रक्षत्वधर्मतः ॥१९॥

**विषयस्वरुपज्ञापकत्वेन शान्तिसार्वस्तुतिः-**

'विषं सकृन्मृते हेतु र्विषयास्तु मुहुर्मुहुः'। इत्याद्यवाणीपीयूषात्, शान्तिर्मृत्युञ्जयाय मे ॥२०॥

***मनःशुद्धिमहिम्ना कुन्थुनाथस्तुतिः-***

'मनःशुद्धिं विना धर्म – क्रियाः सर्वा वृथोदिताः' । येनाद्यदेशनायां तं, कुंथुजिनं नमाम्यहम् ॥२१॥

**रागद्वेषस्वरुपज्ञापकत्वेन अरवरजिनस्तुतिः-**

'भवो नश्यति मूलात् तु, रागद्वेषे क्षयं गते'। इत्याद्यदेशनाऽरस्य, [1]रागाद्यारात् तु पातु वः ॥२२॥

**समतामहिम्ना मल्लिजिन स्तुतिः-**

'साम्यं चेन्न त्वयाऽवाप्तं, धर्मे यत्नस्तु खेदकृत्' । इत्याद्यदेशना मल्लि–प्रभोः साम्यं दधातु नः ॥२३॥

**मार्गानुसारिस्वरुपज्ञापकत्वेन मुनिसुव्रतजिनस्तुतिः-**

'मार्गानुसारिभिर्जीवै, र्योगमार्गे प्रविश्यते'। इत्याद्यदेशको मुनि–सुव्रतो व्रतदोऽस्तु मे ॥२४॥

**श्रावकदिनचर्याख्यातृत्वेन नमिनाथस्तुतिः-**

'जिनोक्तदिनचर्यैव, श्राद्धात्मशुद्धिकारणम्' । इत्याद्यदेशना स्वात्म–शुद्धिं नमेः करोतु मे ॥२५॥

**अभक्ष्यवस्तुनिर्देशकत्वेन नेमिनाथस्तुतिः**

'अभक्ष्यभक्षणाज्जीवाः बम्भ्रमन्ति भवोदधौ' । इत्याद्यदेशना नेमि – नाथस्य भवनाशिका ॥२६॥

**अतिचारस्वरुपख्यापकत्वेन पार्श्वपरमेश्वरस्तुतिः-**

'रक्षेद् दोषाद् व्रतं भव्य!, तत्फलं मुक्तिदाः गुणाः'। इत्याद्यदेशनादातः! पार्श्व! स्थैर्यं व्रते कुरु ॥२७॥

**महाव्रतस्वरुपज्ञापकत्वेन शासनस्थापनाकारकत्वेन च वीरजिनस्तुतिः -**

'अक्षमो यस्तु श्रामण्ये, श्राद्धधर्मं समाचरेत्' । इत्याद्यदेशना वीर! श्रामण्ये वरदाऽस्तु नः ॥२८॥

शासनस्थापनादर्वाक् गणाधिपगुणोचितान् । गौतमादीन् द्विजप्रष्ठान्, वीरेणोक्ताश्च या गिरः ॥२९॥

---

१. आरात्=अरिगणात्

''वादो गणधरस्येति'', ख्याता: श्रीवीरशासने। हेमभूषणधर्मस्य, वपुष्मत: प्रबोधिका: ।।३०।।
युग्मम्

**अन्तिमदेशनासारेण वीरजिनस्तुति:**

हुण्डावसर्पिणी यावज्ज्ञानिनां विरहो ध्रुवम्। प्रकृत्या जड-वक्राणां भावि किं नु वपुष्मताम्?
।।३१।।

मत्वेति करुणात्मा श्री-वीरो हिताय देशनाम् । शिक्षारुपां ददौ तेभ्यो, यावत् षष्टिमुहूर्तकम् ।।३२।।

आदौ प्रवचनेऽस्मिन् य:, स्वप्नाष्टकफलं जगौ । पुण्यपापविपाकादीन् वीरोऽन्तिमक्षणे विभु:
।।३३।।

कृत्वा योगनिरोधं च, निर्वाणं प्राप तीर्थप: । कृपया वीर! सज्ज्ञानं, देहि मह्यं भवे भवे ।।३४।।
(चतुर्भि: कलापकम्)

इत्थं स्तुता जिनाधीशा **ज्ञानविश्वैकभूषणा:** । देशनाऽभीशु[1]-भिरात्माऽज्ञानं हन्तितरां परम्
।।३५।।

**प्रशस्ति:**

तपागच्छाधिराट् **राम-चन्द्रसूरे:** समर्पित: । शिष्यो **जितमृगाङ्क**स्तत्-शिष्यस्यार्जवलक्ष्मण:
।।३६।।

(तथाच)

सूरिरामे परा भक्ति-र्यस्य नित्यं **महोदया** । **महोदय**सूरेस्तस्य योऽनन्यपट्टभृद् गुरु: ।।३७।।

तस्य गच्छाधिप**हेम-भूषणस्य** प्रभावत: । हेमार्हद्देशनासार-मकरोज्**'ज्ञानभूषण:'** ।।३८।।

१. अभीशु = किरण

# बहुरत्ना वसुन्धरा

-*मुनिश्रीदर्शनरक्षितविजयः

वर्तमानकालेऽस्मिन् वर्षे घटिता वार्त्ताऽस्ति।

कर्णावतीनगरीवास्तव्यो जिनयनामा युवाऽस्ति । न्युजिलेन्डमध्ये व्यापारार्थं गतवानासीत् । तत्राऽपि स जिनपूजारात्रिभोजनत्यागाभक्ष्याभक्षणादिजिनधर्माचारान् न विस्मृतवान् । एकदा कस्मिंश्चित् कारणे सति स मुम्बापुर्यामागतवान्, तदा तस्य तातेनोद्वाहयोग्यं स्वं पुत्रं ज्ञात्वैकान्ते समाहूय कथितम्। हे पुत्र! मम मनोगतभावनाऽस्ति, त्वं भवोदधितारिणीं दीक्षां गृहाण। अनन्तभवानन्तरं दुर्लभतममनुष्यभवस्य प्राप्तिर्भवति। प्राप्तमनुष्यभवं सफलीकर्तुं दीक्षैव सर्वोत्तममार्गोऽस्ति। दीक्षामगृहीत्वा कस्यचिदपि मोक्षो न भूतो, न भवति, न भविष्यति च। अतस्त्वं दीक्षां स्वीकृत्य स्वात्मकल्याणं साधय। पुत्रः पितुरीदृशीं भावनां सफलीकर्तुमसमर्थो नीचैर्मुखं कृत्वा सलज्जः स्थितवान्।

पित्रा पुत्रस्याभिप्रायं ज्ञात्वा कर्णावतीनगरवासिनो धर्मनिष्ठपरिवारस्य रीश्वानामपुत्र्या सह परिणायितः। यदोद्वाहदिन आगतस्तदा तद्दिनेऽपि जिनयेन तद्धर्मपत्न्याश्चा-चामाम्लतपः कृतम्, यतः कथमपि रसनालोभेन मित्राग्रहेण वा रात्रिभोजनं किञ्चिदभक्ष्यभक्षणञ्च न स्यात्, निशायां वासनाप्रवाहमवरोद्धुं पौषधव्रतञ्च गृहीतम्।

प्रातः पौषधव्रतं पारयित्वा प्रभुपूजां जिनवाणीश्रवणञ्च कृत्वा पारणकं कृतम्। भोगसाधनप्रचुरे कलिकाले ईदृशै धर्मनिष्ठयुवकैर्जिनशासनं शोभायमानमस्ति। एतद्वृत्तं श्रुत्वा सर्वेषां मुखात् सहजेन शब्दा निसृताः।

''अहो बहुरत्ना वसुन्धरा''

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

# उपदेशकथा

**-* मुनिश्री दर्शनरक्षितविजयः**

एकदा भोजनृपसभायां कश्चित् परदेशिपान्थ आगच्छत् तदा सभायां कालिदासादयोऽनेके विद्वांस आसन्।

परदेशिपान्थो राजानं प्रणम्य कथयति-हे नृप! अनेकै र्विद्वद्भिरलङ्कृतां भवत्सभां श्रुत्वा तिसृणां पूत्तलिकानाम् परीक्षां कर्तुं भवत्समीपे समागतवानस्मि।

एवं कथयित्वा सदृशवर्णरूपोन्नतिवत्यस्तिस्रः पूत्तलिका नृपहस्ते दत्वा कथयति । भवताम् राज्ये विदुषाम् प्रसिद्धि र्मयोच्चैः श्रुता, यदि भवत्सभास्थितविद्वद्वर्या आसामुचितं मूल्यं करिष्यन्ति तर्हि 'अद्यप्रभृति परेषां नृपाणां सभासु विजयेन प्राप्तानि विजयचिह्नानि भवद्भ्यो दातास्मि, अन्यथा भवद्भ्योऽहं विजयचिह्नांकितमेकं सुवर्णचन्द्रकं ग्रहीष्यामि।'

नृपेण तासां पूत्तलिकानां परीक्षां कर्तुं प्रभूता विचक्षणा आहूताः, सर्वेऽपि परीक्षां कर्तुं निष्फला जाताः, तदा नृपेण पूत्तलिकास्थितकाञ्चनं परीक्षितुं मणीकारा आहूताः। मणीकारैः मूल्यं निश्चेतुं तुलायामारोपितास्तदा परदेशिपान्थ ईषद् विहस्य वदति, अनेन प्रकारेण मूल्यकर्तारः प्रभूतास्सन्ति, किन्त्वासां सत्यं मूल्यं ज्ञातुमहं दूरदेशतो भोजनृप! तव सभायामागतवानस्मि।

एवं श्रुत्वा विद्वांसः पूत्तलिकां हस्ते गृहीत्वा सम्यग् रीत्या निरीक्षन्ते, किंतु तासां रहस्यं ज्ञातुमसमर्था विलक्षमुखाः संजाताः, तेषां मुखं दृष्ट्वा क्रोधाभिभूतो नृपो वदति, अस्यां बृहत्यां सभायां कश्चिदेकोऽपि पण्डित आसां मूल्यं कर्तुंमलं नास्ति, हा धिग्।

तदा त्रपानतः कालिदासो वदति-त्रिषु दिनेष्ववश्यमेवासां मूल्यं कथयिष्यामि। इति प्रतिज्ञां कृत्वा स पूत्तलिका नीत्वा गृहं गतवान्। पुनः पुनः सूक्ष्मरीत्या दृष्ट्वा चिन्तयति। तदा तासां कर्णेषु च्छिद्राणि पश्यति, कर्णे छिद्राणि दृष्ट्वा तद्विवरे शलाकां क्षिपति, एवं सर्वपूत्तलिकाकर्णेषु शलाकां क्षिप्त्वा मूल्यं करोति। त्रिदिवसानन्तरं नृपसभां गत्वा । क्रमेण

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

ता: स्थापयित्वा स कथयति। प्रथमाया: पुत्तलिकाया: मूल्यं कपर्दिकामात्रमस्ति, द्वितीयाया: मूल्यं, रूप्यकमात्रमस्ति, तृतीयाया: लक्षमूल्यमस्ति तासां मूल्यं श्रुत्वा सर्वे सभ्यजना: स्मेरानना: संजाता:। परदेशिपान्थो वदति, अनेन कविराजेन यथार्थमूल्यं संपादितम्। तदा *स्मितासनो नृप: कविराजं पृच्छति, भवता समानरुपवर्णोन्नतिवतीनां* पूत्तलि*कानां* पृथग् मूल्यं कथं कथितम्। कालिदासो वदति हे भूमिपाल! मया प्रथमपूत्तलिकाया मूल्यं कपर्दिकामात्रं कथितम्, यतस्तस्या: कर्णे क्षिप्ता शलाका द्वितीयकर्णात् बहिर्निर्गता। उपनयो जगति केऽपि धर्मश्रोतार: एवंविधास्सन्ति। प्रथमपूत्तलिकावदात्महितकरं वचनमेककर्णेन श्रुणोति, श्रुत्वा च द्वितीय कर्णतो बहिर्निष्कासयन्ति तादृशाणाम् श्रोतॄणां धर्ममार्गे मूल्यं कपर्दिकामात्रमस्ति, अतो मया प्रथमपूत्तलिकाया: कपर्दिकामूल्यं कथितम्।

द्वितीयपूत्तलिकाया: कर्णे क्षिप्ता शलाका मुखान् निर्गता। उपनय:- जगति केचित् श्रोतारो द्वितीयपूत्तलिकासदृशा: सन्ति। गुरो: स्वात्महितकरं वचनं श्रुत्वा परेभ्य उपदिशन्ति, किंतु स्वयं धर्मकृत्ये न प्रवर्तन्ते, तादृशश्रोतॄणां धर्ममार्गे रूप्यकमात्रं मूल्यमस्ति। अतो मया द्वितीयपूत्तलिकाया रुप्यकमात्रं मूल्यं कथितम्।

तृतीयपूत्तलिकाया: कर्णे क्षिप्ता शलाका कर्णात् मुखाद् वा बहि र्न निर्गता परं हृदये प्रविष्टा। उपनयो जगत्यतिस्तोका श्रोतारो गुरूणां परलोकहितकारि परमलोकप्राप्तकारि स्वर्गापवर्गप्रापकं च वच: सावधानतया श्रुत्वा धर्मकार्ये यथाशक्ति प्रवर्तन्ते, स्वपरार्थं स्वर्गापवर्गं निश्चिन्वन्ति, ईदृशा: श्रोतारस्तृतीयपूत्तलिकासदृशा: सन्ति। अतो मया तृतीयपूत्तलिकाया लक्ष्यमूल्यं प्रोक्तम्। कविकुञ्जरस्य कालिदासस्य वच: श्रुत्वा भोजनृपोऽपरे विज्ञाश्च संतुष्टा:।

इत्येवं बोधदायकं कथानकं पठित्वा संसारवर्तिनो जीवा: सद्गुरूणामुपदेशामृतं पीत्वा सद्धर्मे यथाशक्ति प्रयतताम्।

।। शिवमस्तु ।।

# आज्ञायामेव हि सर्वार्थसिद्धिः

-*मुनिश्रीप्रशमरक्षितविजयः

संसारे बम्भ्रमतां संसारिजीवानां जीवाहिंसाऽवितथभाषणचौर्याद्यसत्प्रवृति-करणात् तथा शरीराङगच्छेदनादिदण्डो न स्याद्, यथा त्वाज्ञाभङ्गे। आज्ञाभङगस्तु महदपायस्यानन्यनिबन्धनमेव नियमाद्।

वैद्यचिकित्सात्मके धर्मे यथाऽऽज्ञायाः प्रधानत्वमस्ति, तथैव लोकोत्तरे जैनधर्मेऽप्याज्ञायाः प्रधानत्वमेवास्ति।

तद्यथा, वैद्यशास्त्रेषु कथितं यद्, सर्वेष्वपि भेषजेषु रोगप्रतिकारात्मिका शक्तिः स्थितवत्येव। तथापि तत्परिभोगादवश्यं रोगिनां रोगा दूरीभवन्तीति न, तर्हि किम्? यदि वैद्यस्य सूचनानुसारेण ये भेषजानि गृहणन्ति, ते नूनं नीरोगीभवन्त्येव, न तत्र शङ्काशङ्कयोरवकाशः। यदि भेषजज्ञस्य वैद्यस्य ये सूचनानुसारेण न गृहणन्ति किन्तु स्वमतिसङ्कल्पानुसारेण गृहणन्ति, तदा लाभस्तु नैव स्यात्, प्रत्युत कदाचिद् महानपायोऽपि स्यात्। फलितमेतद् यद्, न केवलं भेषजानि रोगा हरन्ति सर्वेषां, परञ्च भैषजज्ञेन वैद्येन कथितान्येव रोगान् हरन्ति। इदं तु सर्वेषां स्वानुभवसिद्धमेव तथा सर्वज्ञसंस्थापिते शासने नानाविधानि भावात्मकरागादिरोगापनयनालम्भूतान्यनुष्ठानानि सन्ति। तेषु कानिचित् सम्यग्दर्शनविशुद्धिहेतूनि, कानिचिद् देशविरतिधर्मोपष्टम्भानि, कानिचिद् वा सर्वविरतिधर्मावलम्बनानि। तथापि तै र्भावात्मकरागादिरोगा अवश्यमेव नश्यन्तीति न, तर्हि किम्? सर्वज्ञवैद्याज्ञानुसारेण यद्यनुष्ठानानि समनुष्ठितानि तर्हि नियमादेव तैर्भावात्मकरागादिरोगा विनश्येयुः, यदि सर्वज्ञवैद्यवचनानुसारेण अनुष्ठानानि न विधीयन्ते, तदा रागादिभावरोगा न नश्यन्ति, प्रत्युत द्वयादिगुणभावेन वर्धन्ते। अतः सर्वज्ञवचनानुसारेणैव हि सर्वाण्यप्यनुष्ठानानि कर्तुं प्रयतन्ताम्।

**यत आज्ञायामेव हि सर्वार्थसिद्धिरस्ति।**

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

# श्रीसरस्वतिस्तुत्यष्टकम्

**-*मुनिश्री प्रशमरक्षितविजयः**

ज्ञानामृताम्भोनिधिपोततुल्या, संशुद्धशुभ्रामलवस्त्रदेहा ।
संयच्छतु ज्ञाननिधानमेकं, सरस्वती मे जगति प्रसिद्धा ।।१।।

अज्ञानसंमोहतमोदिनेशां, राकानिशेशोज्ज्वलवस्त्रपद्मामाम् ।
प्रणौमि देवीं श्रुतशेवधीशां, त्वत्पादपद्मभ्रमरायितोऽहम् ।।२।।

सरोरुहन्यस्तपदाम्बुजाते!, नरेन्द्रदेवेन्द्रमुनीन्द्रसेव्ये! ।
त्वदाश्रयान्नूनमहो शरण्ये!, भवन्ति मूर्खा अपि देवि! दक्षाः ।।३।।

पिताऽसि माताऽसि जगत्त्रिवन्द्या, भ्राता स्वसा त्वंश्च जगत्त्रिपूज्या ।
त्रात्री जगद्बालिशदेहिनाञ्च, नमोऽस्तु तुभ्यं श्रुतदेवतायै ।।४।।

सरस्वतीतः प्रसृता सुधागीः, प्रावृड्पयोवाहनिनादधीरा ।
गणाधिराजाननर्तिका वः, श्रेयोऽर्थमस्तु प्रथितप्रभावा ।।५।।

गुणौघकारी श्रुतवर्धकश्च, हितैककारी तिमिरापहारी ।
जगज्जनेषु श्रुतदेवतायाः, प्रसादगन्धः परितस् तनोतु ।।६।।

---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

वाग्देवताभक्तिसमन्वितोऽहं, वाग्देवतासंस्तवनं करोमि ।
याचे वरं ज्ञानवरं सदैव, वाग्देवते! त्वद्वरदानलाभम् ॥७॥

प्रशमसौख्यसुधारसदायिनि!, भविसमीहितकल्पमहीरुहे ।
परममङ्गलकारकनामिके, जयतु देवि! सरस्वति! विष्टरे ॥८॥द्रुतविलम्बितम्

गुरुवरो **जयकुञ्जर**सूरिपः, प्रभपदान्वित**मुक्ति**गुरुश्च मे ।
विरचितं विनयि**प्रशमेन** वै, गुरुयुगस्य महाकृपयाऽष्टकम् ॥९॥

## लेखप्रेषकेभ्यो विज्ञप्तिः

* "श्रीनिःश्रेयसम्"पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीयाऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्।

* स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते।

* नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यकी।

* ये लेखा निर्णितप्रकाशनदिनात् चैत्रकृष्णाद्वादशीदिनाऽभ्यन्तरे (दि.१६ एप्रिल) मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते,

* तदनन्तरं प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्।

* गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसंधिः कर्तव्यैव।

* अर्थभेदस्थाने एव "अवग्रहः" कर्तव्यः।

* अनुस्वारानुनासिकयो र्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वारस्तत्रानुस्वारकरणे न बाधा।

* लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणामेवाधिकारो भविष्यति।

-प्रकाशकः

# श्री शंखेश्वरपार्श्वजिनस्तोत्रम्
(वशंततिलका)

-* श्रद्धेयचरणः

य: पार्श्वनाथभगवांस्-त्रिजगद्दिनेशो-
य: पार्श्वनाथभगवांस् त्रिजगन्निशेश: ।
य: पार्श्वनाथ भगवांस् त्रिजगज्जनेश:
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।१।।

यं सर्वदा सुमनसा यतयो जपन्ति
यं सर्वदा सुमनसा त्रिदशा: स्तुवन्ति ।
यं सर्वदा सुमनसा भविका भजन्ति
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।२।।

येनातिदुर्मदभृत: प्रहतो रतीशो
येनेह विश्वसुजने स्फुरितं शमित्वम् ।
येनोरगोऽहिपसुरत्वमुदारमापि
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।३।।

यस्मै नमन्ति मनुजामरदानवेन्द्रा-
यस्मै नमन्ति विमलात्ममुनीन्द्रनाथा: ।
यस्मै नमन्ति भविका नतमस्तकेन
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।४।।

---

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्ती।

यस्मान्मया विमल आप्त उदारभोगो
यस्मान्मया विमल आप्त उदारबोधः।
यस्मान्मया विमल आप्त उदारधर्मः
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।५।।

यस्य व्रतीश्वरपतेरतिशायिनी श्रीर्-
यस्य व्रतीश्वरपतेरतिशायिनी भाः।
यस्य व्रतीश्वरपतेरतिशायिनी वाक्
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।६।।

यस्मिन् विभौ सकलसत्त्वहिताभिलाषा
यस्मिन् विभौ सकलवर्यगुणप्रतिष्ठा ।
यस्मिन् विभौ सकलभव्यजनैकनिष्ठा
शंखेश्वरं तदधिपं प्रणमामि पार्श्वम् ।।७।।

हे पार्श्व! विश्वजनमानससौख्यहेतुर्
हे पार्श्व! भीमभवसागरवर्यसेतुः।
हे पार्श्व! कामितमनोरथकामधेनुः
शंखेश्वरं तमधिपं प्रणमामि पार्श्वम् ।।८।।

शंखेश्वरस्थ! जिनपार्श्व! जगज्जनेशस्-
त्रैलोक्यमण्डनविभुर्नतनाकिनाथः।
धर्म्या वसंततिलकास्तवना कृताऽत्र
शंखेश्वरे श्रमण**संयमभूषणेन** ।।९।।

# श्रेयस्करीजिनस्तुति चतुर्विंशी

-साध्वीजीश्रीप्रशमनिधिश्री:

## (६) श्री पद्मप्रभजिन स्तुति:

सप्तदशाक्षरीयात्यष्टिजातौ 'मन्दाक्रान्ता' नामसमवृत्तम्।

**वर्णन्यास :-** ऽऽऽ ऽ।। ।।। ऽऽ । ऽऽ । ऽऽ – चतुर्भिर्षड्भिस्सप्तभिरक्षरै: यति: विराम: ।

**श्लोक :- रक्तत्वं यत्करचरणयो:, सौकुमार्यं शरीरे।**
**श्वासे दृष्ट्वा सहजसुरभिं, मानसेऽसङ्गताश्च ।**
**पद्मं पद्माश्रयपदश्रितं, स्वाऽधिकं लिप्सयेव ।**
**पद्मां पद्माङ्कभृदनुपमा-मात्मीयां मे स दद्यात्** ।।६।।

**अन्वय: :-** यत्करचरणयो: रक्तत्वं, शरीरे सौकुमार्यं,
श्वासे सहजसुरभिं, मानसेऽसङ्गताश्च दृष्ट्वा
स्वाऽधिकं लिप्सया इव पद्मं पद्माश्रयपदश्रितं
स पद्माङ्कभृद् मे अनुपमामात्मीयां पद्मां दद्यात् ।।६।।

**विवरणं :- रक्तत्वं...**इति। **स पद्माङ्कभृद्** – कमललक्ष्मधारक: – पद्मप्रभस्वामी, **मे** – मम, **आत्मीयां** – आत्मगुणसम्बधिनीं **पद्मां** – लक्ष्मीं **दद्यात्** – वितरतु । कीदृशीं – **अनुपमां** – अद्वितीयां । स इति क:? **यत्करचरणयो:** यस्य हस्तपादतलयो: **रक्तत्वं** – लौहित्यं, **दृष्ट्वा** – निरीक्ष्य, **पद्मं**-कमलं-पङ्कजं, **पद्माश्रयपदश्रितं** अस्तीति गम्यं । पद्माया:-श्रिय: आश्रयौ यौ पदौ, तौ श्रितं यत् तद् । पुन: किं दृष्ट्वा? **सौकुमार्यं** –

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

कोमलता। कस्मिन्? **शरीरे** - तनौ । पुनः किं दृष्ट्वा? **सहजसुरभिं** सहजां-निष्कृत्रिमां-स्वभाविकं-सौरभं। कस्मिन्? **श्वासे** । पुन किं दृष्ट्वा? **असङ्गतां** - निर्लेपतां। कस्मिन्? **मानसे**-हृदये । **चौ** - समुच्चयार्थौ । किमर्थमिव? **स्वाऽधिकं** - स्वतोऽधिकं स्वरक्तत्वसौकुमार्य-सौरभ-निर्लेपताभ्योऽधिकलिप्सया लोभेनेच्छया इव । (परमात्मनि स्वीयसर्वगुणान् स्वतोऽपि श्रेष्ठतमान् दृष्ट्वा स्व-स्वामिनीं लक्ष्मीमपि तत्रैव प्रभुचरण एव श्रितां निरीक्ष्य स्वतोऽधिकगुणलाभलोभेन पद्मं लक्ष्मव्याजेन मिषेण प्रभुपदकमले समुपस्थितमिति उत्प्रेक्षा ।

**वृत्तवैशिष्ट्यं:-** अत्र उत्प्रेक्षालङ्कारः, तृतीयचतुर्थपादयोः आद्याव्यपेत-यमकालङ्कारश्च ।

एतत्सप्तदशाक्षरीयाऽत्यष्टिजातौ **'मन्दाक्रान्ता'** नामसमवृत्तम्। तल्लक्षणञ्च सिद्धहैमछन्दोऽनुशासने द्वितीयेऽध्याये '२९०' तमे सूत्रे ''मोभ्नौ तौ गौ **मन्दाक्रान्ता** घचैरिति'' । घचैरिति चतुर्भिर्षड्भिश्च यतिः-विरामः।

## (७) श्रीसुपार्श्वजिनः स्तुतिः

नवाक्षरीयबृहतीजातौ **'कनक'** नामसमवृत्तम्।

**वर्णन्यासः:-** ऽऽऽ ।।ऽ ।।ऽ

**श्लोक :-** **पृथ्वीसूः पृथिवीव प्रभो! त्वं सर्वंसहनाय प्रभुः ।**
**तां सर्वंसहतां दिश मे, भूयाज्जन्म यतः सफलम् ।।७।।**

**अन्वयः :-** हे पथ्वीसूः! त्वं पृथिवीव सर्वंसहनाय प्रभुः।
हे प्रभो, तां! सर्वंसहतां मे दिश, यतो जन्म सफलम् भूयात्।

**विवरणं :-** पृथ्वीसूः...इति । हे प्रभो! पृथ्वीसूः! - पृथ्वीनामनृपपट्टराज्ञीनन्दन-सुपार्श्वनाथ! त्वं-भवान् पृथ्वीव-भूमिवत् सर्वंसहनाय-समस्ततितिक्षायां, प्रभुः - समर्थोऽसि। तां - सर्वंसहतां-क्षमाह्वयगुणं । मे- मां - मह्यम् - दिश - देहि - अर्पय । यतः - यस्मात् । ततः मे जन्म - एतद्भवः सफलं-फलवद्-कृतार्थं । भूयात् - भवेत्।

**वृत्तवैशिष्ट्यं :-** अत्र प्रथमपादे आदिव्यपेतः-द्वितीय-तृतीयपादयोश्च मध्यमव्यपेत-यमकालङ्कारः उपमालङ्कारश्च!

इदं नवाक्षरीयबृहतीजातौ 'कनक' नाम समवृत्तम् ।
तल्लक्षणं हैमछन्दोऽनुशासने द्वितीयेऽध्याये ।
१७ तमे सूत्रे 'म: सौ **कनकम्**' इति ।

## (८) श्री चन्द्रप्रभजिन स्तुति:

दशाक्षरीयपङ्क्तिजातौ **'पणव'**-नामसमवृत्तम्।

**वर्णन्यास :-** ऽऽऽ ।।। । ऽऽ ऽ - पञ्चभिरक्षरैर्यति:-विराम: ।

**श्लोक: :-** **त्वं चन्द्रप्रभ! भवमूर्धस्थ !, प्रीणीसे भविकुमुदं मूर्त्या ।**
**हृद्वारांनिधिशशभृत् ! सौम्य ! तापं मे हर भवरागाग्ने: ।।८।।**

**अन्वय: :-** हे चन्द्रप्रभ!, भवमूर्द्धस्थ!, हृद्वारांनिधिशशभृत्!,
सौम्य!, त्वं भविकुमुदं मूर्त्या प्रीणीसे। मे भवरागाग्नेस्तापं हर।

**विवरणं :-** **त्वं...। हे चन्द्रप्रभ!** अष्टमतीर्थङ्कर! **त्वं**-भवान् **भविकुमुदं**-भव्यजीव-कैरवं, **मूर्त्या** - मुद्रया - प्रतिमया **प्रीणीसे** - आह्लादसे। कीदृशो भवान्? **भवमूर्धस्थ!** भव:-संसार:-लोकस्तस्य मूर्ध्नि-शिरसि स्थित: य: स तत्संबोधनम्। पुन: कीदृग्? **सौम्य!** शान्त! । पुन: कीदृग्? **हृद्वारांनिधि-शशभृत्!** - हृद् - हृदय: एव वारांनिधिस्तत्समुल्लासने शशभृत् - चन्द्र: य: स तत्सम्बोधनम् । **मे** - मम **भवरागाग्ने:** भवस्य भवे वा राग: एव अग्नि: - वह्निस्तस्य, **तापं** - घर्म **हर**-दूरीकुरु। चन्द्रपक्षे भव: - शिवस्तस्य मूद्र्ध्नि द्वितीयाचन्द्रस्तिष्ठति इति लोकख्याति:। इति सर्वाणि विशेषणानि चन्द्रपक्षेऽपि सुतरां घटन्ते एव।

**वृत्तवैशिष्ट्यं :-** अत्र श्लेषानुप्राणित-व्यस्तरुपकालङ्कार: ।
इदं-दशाक्षरीयपङ्क्तिजातौ 'पणव' नाम समवृत्तम् ।
तल्लक्षणं चेत्थं हैमछंदोऽनुशासने द्वितीयेऽध्याये १०९ तमे सूत्रे
'मन्यगा: **पणवो** डै:' इति । 'डै' रिति पञ्चभिरक्षरैर्यति: विराम:।

## (९) श्री सुविधिजिनस्तुति:

द्वादशाक्षरीयजगतीजातौ **'तोटकं'** - नाम समवृत्तम्।

**वर्णन्यास :-**।।ऽ ।।ऽ ।।ऽ ।।ऽ

**श्लोकः :-** **सुविधे! सुविधिं सुनिधाय सदा, कुविधिं विनिवारय मन्मनसः,**
**सुजनेषु जनेषु शुभां सुभगां, सुविधे! सुविधेहि धियं सुखदाम्।।९।।**

**अन्वय :-** सुविधे! सुविधे! सदा सुविधिं सुनिधाय मन्मनसः कुविधिं विनिवारय। सुजनेषु, जनेषु, शुभां, सुभगां, सुखदां, धियं सुविधेहि।

**विवरणं :-** हे **सुविधे!** सुष्ठुभाग्यवान्! हे **सुविधे**-सुविधिनाथ! मन्मनसः-मच्चित्तात् **कुविधिं** - अकार्यं **विनिवारय** - निष्काशय। किं कृत्वा? **सुनिधाय** - संस्थाप्य। कां? **सुविधिं** - सत्यविधिं-तात्त्विकीं क्रियां। कदा? सदा। **सुजनेसु** - सज्जनेषु,- **जनेषु** - लोकेषु, **शुभां** - कल्याणीं **सुभगां** - सुन्दरां, **सुखदां** - सुखंकरां, **धियं** - सन्मतिं, **सुविधेहि** - विनियोजय।

**वृत्तवैशिष्ट्यं :-** अत्रप्रथमतृतीयचतुर्थपादेषु आद्याव्यपेतयमकालङ्कारः।
इदं द्वादक्षारीयजगतिजातौ 'तोटकं' नाम समवृत्तम्।
तल्लक्षणं हैमछन्दोऽनुशासने द्वितीयेऽध्याये '१६२' तमे सूत्रे
''सीस्तोटकम्'' इति।

## (१०) श्री शीतलजिनस्तुतिः

द्वादशाक्षरीय जगतीजातौ **'द्रुतविलम्बित'** - नाम समवृत्तम्।

**वर्णन्यास :-** ।।। ऽ।। ऽ।। ऽ।ऽ

**श्लोकः :-** **भ्रमणभ्रान्तिभिदं भूविभूषणं, भवभयाभयदं भवपारगं।**
**सहजशीतलशीतलतीर्थपं, परमप्रीतिप्रदं प्रणमाम्यहम्।।१०।।**

**अन्वय :-** भ्रमणभ्रान्तिभिदं, भूविभूषणं, भवभयाभयदं, भवपारगं, परमप्रीतिप्रदं सहजशीतलशीतलतीर्थपं प्रणमाम्यहम्।

**विवरणं :-** **भ्रमणभ्रान्ति...।** अहं - **सहजशीतलशीतलतीर्थपं**-सहजशीतल-माजन्मसौम्यं-स्वाभाविकशान्तं च तद् शीतलतीर्थपं - शीतलतीर्थनाथं - **प्रणमामि**-भावप्रकर्षेण नमस्करोमि। कीदृशं? **भ्रमणभ्रान्तिभिदं** भ्रमणं - संसृतौ पर्यटनञ्च भ्रान्तिः - मिथ्यात्वं च ते भिनत्ति यः स तं। पुनः कीदृशं? **भूविभूषणं** भूः - पृथ्वी तस्या विभूषणं - अलङ्कारं। पुनः कीदृशं? **भवभयाभयदं** - भवः संसारः राग-द्वेष-मोहरुपस्तस्य भयः-

भीस्तस्माद् अभयं ददाति यः स तं। पुनः कीदृशं ? **भवपारगं** -भवात् - संसारात् पारं-कूलं-मोक्षरुपं गच्छति प्राप्नोति यः स तं । पुनः कीदृशं ? **परमप्रीतिप्रदं** - परमा-श्रेयसी प्रीतिः-आनन्दस्तां प्रददाति यः स तं ॥१०॥

**वृत्तवैशिष्ट्यं :-** प्रथमचतुर्थपादयोः पदगतवृत्यनुप्रासालङ्कारः।

तृतीयपादे अव्यपेतयमकालङ्कारः।

द्वितीयपादे च पदगतश्रुत्यनुप्रासालङ्कारः।

एतद्द्वादशाक्षरीयजगतीजातौ 'द्रुतविलम्बितं' नाम समवृत्तम्।

अन्ये तु - एनं हरिणप्लुतमिति - आहुः - (भरतः)

तल्लक्षणं तु हैमछन्दोऽनुशासने द्वितीयेऽध्याये '१६३' तमे

सूत्रे "नभभ्रा द्रुतविलम्बित" मिति

# प्रार्थना

-*श्री शान्तप्रकाशः सत्यदासः
(हीन्दीभाषातः संस्कृतरूपान्तरकारः)

* तादृक्संन्यासं यच्छतु मे, नाथानामपि चिन्ता न भवेत् ।
भूयासं कस्यापि न नाथः, कश्चिन्न ममापि भवेन्नाथः ॥१॥

* न स्यान्मयि धनवृद्धेश्चिन्ता, यो लाभः स्यात् तस्मिंस्तुष्टः,
आशा तु सदा भवदीया स्या-च्चेतसि चिन्तादाहो न भवेत् ॥२॥

* अपमानं वा कामं भूयात्, सन्मानं वा सदने सदने,
उभयावस्थायामस्तु स्मिति-र्नो वैफल्येऽपि विलापः स्यात् ॥३॥

* अनुकम्पे परकीये दुःखे, स्वीयं दुःखं नो कम्पयताम्,
परकीयसुखं मन्ये स्वसुखम्, सुखिनो दृष्ट्वा न भवेदीर्ष्या ॥४॥

* जीवनवसनेऽस्मिन् वर्णदलम्, स्यान्मालिन्यं किन्तु न किञ्चित्,
जीवनवार्ध्युच्चतरङ्गस्थम् स्यात्, किन्तु न कुदिशागामि मनः ॥५॥

---

* स्टार स्टुडियो, इन्दिरा चौक, नागदा-७५६३३५ जं. (म.प्र.)

# नैतिकता-विवेक:

-*शान्तप्रकाश: सत्यदास:

हिन्दीभाषाया एको महाकविरलिखत्

''व्यक्तिका है धर्म तप करुणा क्षमा व्यक्तिकी शोभा विनय भी त्याग भी।

किन्तु उठता प्रश्न जब समुदायका, भूलना पडता हमें तप त्यागको ।।''

अस्यामुक्तौ योऽस्ति विचारस्तेनाहमत्र स्ववैमत्यं प्रचिकटिषामि।

यैर्गुणैर्भवति कल्याणं तेषां धारणं नैतिकता, कामं धारयेत् तान् व्यक्ति: समुदायो वा। को भेद: ? यो गुणो व्यक्ते: कल्याणं कर्त्तुमर्हति स: समुदायस्य कथमकल्याणं कुर्यात् ?

अत्रोद्धृतपद्यस्थगुणानां विषये क्रमशोऽधुना विचारयाम:।

प्रथमो गुणस्तप:। अनशनादितपसा व्यक्तये स्वास्थ्यलाभ: समाजाय च खाद्यान्नाभावसमस्यानिवारणं भवति। तत्कालीनप्रधानामात्येन श्रीमता लालबहादुरशास्त्रिणा प्रतिचन्द्रवासरमेकाशनं करणीयमिति निवेदिताऽऽसीज्जनता।

द्वितीया करुणा। सा परोपकारार्थं प्रेरयति व्यक्तिमपि समाजमपि। व्यक्ति: करुणाजन्यं धनदानं कृत्वा क्षुधितव्याधिग्रस्तविकलाङ्गादीनां वेदनां हरति। समाजोऽपि करुणाजन्यधनदानैर्भूकम्पाऽनावृष्ट्यतिवृष्टिसङ्क्रामकरोगादिपीडितानां लक्षशो जनानां वेदनां हरति।

तृतीया क्षमा। सोपादेया व्यक्तिभि: समुदायैश्चापि। तामधिकृत्य ''क्षमा वीरस्य भूषणम्।।'' इति कथ्यते। कयापि विवशतया योऽपराधं करोति, कृतमपराधं स्वीकृत्य सलज्जं क्षमां याचते, भविष्यति काले तादृशमपराधं न कर्त्तुं प्रतिजानाति, सोऽवश्यं क्षन्तव्य:, परन्तु यत्रापराधिन: शुद्धेर्न भवेत् सम्मानना तत्र क्षमाऽनुचिता व्यक्तिद्वारापि समाजद्वारापि च। महात्मना गान्धिना घातकोऽपि गोडसे क्षान्त:, किन्तु समाजेन दण्डित:,

* स्टार स्टुडियो, इन्दिरा चौक, नागदा-७५६३३५ जं. (म.प्र.)

तन्याय्यम्; परन्तु समाजनिर्णय: सदा सर्वत्र समुचित एव भवतीति वक्तुं न शस्यते। यतो येन शतशोऽपराधिन: क्षान्ता:, निरपराधोऽपि स यीशु: समाजेन दण्डित:।

अपरतश्च यदि रावण: क्षान्तोऽभविष्यत् तर्हि सहस्रश: रावणा जन्मान्यग्रहीष्यन् तथा लक्षश: सीता अचोरयिष्यन् छलबलाभ्याम्। अपराधिने दत्तो दण्डोऽपि भाविनोऽपराधान् निवारयति; अत: क्षमा दण्डयोर्नीत्यो: कुत्र कदा कस्या: कियानुपयोग: श्रेयान्? इति निर्णय: स्वपरकल्याणनिकषे शक्य: कर्त्तुं, नान्यथा।

चतुर्थो विनय:। यमाश्रित्य-"सकलगुणभूषा च विनय: ।।"

इत्युच्यते मनीषिभि:। स्वकीयकृतज्ञताया: स्वीकरणं प्रकटीकरणञ्च विनय:। उपकृतजनैर्येषामुपकारिणामुपकाराणां निष्कृतिर्धनेन कर्त्तुं न शक्येत, तान् जननीजनकादीन् प्रति वैयक्तिको विनय: प्रकटीक्रियते प्रणामाञ्जलिचरणस्पर्शवनन्दनादिरूपेण। स्वकीयोपदेशै र्यैस्तत्कालीनजनसमाजस्य कृते मार्गदर्शनं कृतं तेषां रामकृष्णमहावीर-बुद्धयीशुमुहम्मदजरथुस्तकन्फ्यूशियसादिमहामानवान् प्रति स्तुतिप्रार्थना जयन्त्युत्सवाद्या-योजनै: सामुदायिको विनय: प्रकटीक्रियते।

अहङ्कार: प्रगतौ बाधक:, नमस्कारस्तु साधक:! तथाप्यहङ्कारिभ्यो नमस्कार:, दुष्टेभ्य: शिष्टाचार:, दुर्जनेभ्य: सौजन्यम्, दुर्विनीतेभ्यो विनय: सर्वथाऽनुचित: यतस्तेन तेषां दौरात्म्यं क्रमशो वर्धत एव। विशिष्टो नयो विनय:। स सदा सज्जनेभ्य: कृत एव श्रेयस्कर:। गौरवहीनताया दीनताया वा विनयेन तथैव कोऽपि सम्बन्धो न भवति यथा भीरूताया: क्षमया।

पञ्चम: सद्गुण: त्याग:। स: कल्याणकृद् भवेत् तदैवोपादेय:। सहस्ररूप्यकाणां कर्गजमुद्रा: प्रज्वाल्य चायपेयनिर्मिति र्वैयक्तिकाऽनीतिस्तथैव कुत्रचित् सेतौ गच्छन्त्यां बाष्पगन्त्र्यामुपविष्टैर्यात्रिभि: अधस्तान्नदीजले व्यर्थं धातुमुद्राक्षेपणं सामुदायिकाऽनीति:; किन्तु सार्वजनिककार्येषु प्रत्यक्षं परोक्षं वा वैयक्तिकरूपेण सामुदायिकरूपेण वा कृताऽऽर्थिकसहायता सार्थकत्वादुपादेयत्याग:।

एवमेव समस्तसद्गुणानां विश्वकल्याणनिकषे परीक्षणं कर्त्तव्यम्। एष नैतिकताविवेक:। सद्गुणस्तु श्रेयस्करत्वात् सद्गुण एव। तत्र वैयक्तिकसामुदायिकयोर्भेदो न युज्यते-इति निष्कर्ष:।

# मानसोल्लासः

-*डॉ. एच. वि. नागराजराव्

संस्कृतभाषायां विपुलं साहित्यं रचितं प्राचीनैः पण्डितैरनेकेषु शास्त्रेषु। केचन प्रज्ञया विश्वरहस्यप्रकटीकरणसम्बद्धानि दर्शनानि प्रणिन्युः। अन्ये प्रतिभया काव्यानि निबबन्धुः। अपरे लौकिकप्रयोजनपरान् ग्रन्थान् रचयामासुः।

एवं गम्भीरश्च विशालश्च वाङ्मयं समुद्रोपममुपलभ्यते देववाण्याम्। सकलानिमान् विषयानेकत्र समावेशयितुङ्केचिन्महानुभावा विश्वकोशसदृशीः कृतीरपि रचयामासुरिति विशेषः। तादृशीषु कृतिषु लभते प्रथमगणनां "**मानसोल्लासः**"।

अस्य बृहद्ग्रन्थस्य रचयिता सोमेश्वराख्यो भूपतिः। स शशास कर्णाटकवसुन्धराम्। तस्य पिता चालुक्यवंशप्रदीपो विक्रमादित्यः, यस्य प्रतापं, प्रभावं, प्रकर्षञ्च बिल्हणकविः, विक्रमाङ्कदेवचरितमिति प्रथिते महाकाव्ये वर्णयामास। विक्रमादित्यस्य शासनकालः क्रिस्तशकानुसारेण १०७६ तः ११२७ तमवर्षपर्यन्त इति इतिहासकारा वदन्ति।

अस्य राजधानी कल्याणनगरी तदा ख्याततमासीत्।

"नासीदस्ति भविष्यति क्षितितले कल्याणतुल्यं पुरम्" इति सा वर्णिता। विक्रमादित्यस्य सुतः सोमेश्वरः मानसोल्लासस्य कर्ता। अस्य ग्रन्थस्यापरं नामधेयम्- **अभिलषितार्थचिन्तामणिरिति**।

पुष्पिकासु नामद्वयमप्युपलभ्यते यथा-

"इति श्री महाराजाधिराजसत्याश्रयकुलतिलकचालुक्याभरणश्रीमद्भूलोकमल्ल-श्रीसोमेश्वरदेवविरचिते मानसोल्लासेऽभिलषितार्थचिन्तामणौ राज्यप्राप्तेर्हेतूपायकथने प्रथमं प्रकरणम्"

* डॉ.एच. वी. नागराज राव ९० ९वाँ क्रॉस, नवीलूरोड, कूपेम्पूनगर, मैसूर-५७० ०२३ कर्नाटक।

ग्रन्थान्ते केचित् सन्ति श्लोका ये तत्पठनफलं वदन्ति। यथा-

* इदं श्रुणोति यः शास्त्रं, तस्य धर्मे मतिर्भवेत् ।
  कौशलं चार्थशास्त्रेषु, राजनीतिरभीप्सिता ।।

* सेवायां दक्षता चैव, साहित्ये नैपुणी तथा ।
  तर्केषु पाटवं सम्यक्, छन्दोऽलङ्कारवेदिता ।।

* वैदग्ध्यं शास्त्रविद्यायां, गजाश्वारोहणाज्ञता ।
  विज्ञानं मल्लविद्यायां, युद्धज्ञानं तथैव च ।।

* सङ्गीतविद्याकौशल्यं, जायते नात्र संशयः ।
  कामधेनुरिदं शास्त्रं, **मानसोल्लास**संज्ञितम् ।।

* नास्त्यनेन समं शास्त्रं, सर्ववस्तुप्रकाशने ।
  ब्राह्मणो लभते ज्ञानं, क्षत्रियो राज्यमाप्नुयात् ।
  वैश्यो विभवमत्यर्थं, शूद्रो वृत्तिं तथा सुखम् ।। इति ।।

अस्मिन ग्रन्थे पञ्च प्रकरणानि भवन्ति। प्रतिप्रकरणं विंशतिरध्यायाः। प्रत्यध्यायं भिन्नो विषयः प्रतिपाद्यते। एवं विषयशतमत्र सविस्तरं निरुपितमिति ज्ञेयम्।

असत्यवर्जनम्, परद्रोहवर्जनम्, अगम्यवर्जनम्, अभक्ष्यवर्जनम्, असूयावर्जनम्, पतितसङ्गवर्जनम्, क्रोधवर्जनम्, आत्मस्तुतिवर्जनम्, दानम्, प्रियवचनम्, इष्टापूर्त्तम्, अशेषदेवताभक्तिः, गो विप्रतर्पणम्, पितृतर्पणम्, अतिथिपूजनम्, गुरुशुश्रूषा, तपः, तीर्थस्नानम्, वैद्यः, शरणागतरक्षणम्, स्वामी, अमात्यः, राष्ट्रम्, कोशः, दुर्गः, बलम्, सुहृत्, प्रभुभक्तिः, मन्त्रशक्तिः, उत्साहशक्तिः, सन्धिः, विग्रहः, यात्रा, आसनम्, आश्रयः, द्वैधीभावः, साम, भेदः, दानम्, दण्डः, गृहभोगः, स्नानम्, पादुका, ताम्बूलम्, विलेपनम्, वस्त्रम्, माल्यम्, भूषणम्, आसनम्, चामरम्, आस्थानम्, पुत्रः, अन्नम्, पानीयम्, पादाभ्यङ्गम्, यानम्, छत्रम्, शय्या, धूपः, स्त्रीभोगः, शस्त्रविनोदः, शास्त्रविनोदः, गजवाह्याली, तुरगवाह्याली, अङ्कः, मल्लः, कुक्कुटः, लावकः, मेषः, महिषः, पारापतः, सारमेयः, श्येनः, मत्स्यः, मृगया (एतेषां विनोदाः) गीतविनोदः वाद्यविनोदः, नृत्यविनोदः, कथाविनोदः, चमत्कारविनोदः, भूधरक्रीडा, वनक्रीडा, आन्दोलनक्रीडा,

सेचनक्रीडा, जलक्रीडा, शाद्वलक्रीडा, वालुकाक्रीडा, चतुरङ्गक्रीडा, पाशकक्रीडा, वराटिकाक्रीडा, फञ्जिदाक्रीडा, फञ्जिकाक्रीडा, तिमिरक्रीडा, वीरक्रीडा, प्रेमक्रीडा, सुरतक्रीडा इति शतं विषया ग्रन्थेऽस्मिन् दृश्यन्ते।

ग्रन्थादौ सोमेश्वरो गणेश्वरं, सरस्वतीं, महेश्वरं, कृष्णं, ब्रह्माणं, शक्रं, सूर्यं, मन्मथञ्च नमस्कृत्य प्रतिपादनमारभते।

* चालुक्यवंशतिलकः श्री सोमेश्वरभूपतिः।
कुरुते मानसोल्लासं शास्त्रं विश्वोपकारकम् ।।

* शिक्षकः सर्ववस्तूनां जगदाचार्यपुस्तकः।
अभ्यस्योऽयं प्रयत्नेन सोमभूपेन निर्मितः ।। इति ।।

अत्र केचनाध्याया अतीव ह्रस्वाः। आत्मस्तुतिवर्जनाध्याये एक एव श्लोको विद्यते। केचनाध्यायाः सुदीर्घाः। गीतविनोदाध्याये सप्तषष्ट्यधिकपञ्चशतश्लोकाः (५६७) सन्ति।

राजा सर्वेषु धर्मेसु, सर्वासु देवतासु च समानां भावनां धारयेत प्रजानाङ्कस्मिँश्चित् समुदाये पक्षपातं न कुर्यादिति ग्रन्थकर्तुर्दृढः सिद्धान्तः। स वदति-

* अन्येषामपि देवानां, निन्दां द्वेषं च वर्जयेत्।
देवं देवकुलं दृष्ट्वा, नमस्कुर्यान्न लङ्घयेत् ।।इति।।

वैद्यके, सङ्गीते, क्रीडायां, विनोदे, भोजने च विशिष्टान् विषयान् प्रतिपादयति सोमेश्वरः। तेषु शास्त्रेषु तस्य प्रावीण्यमासीदिति भाति। कवितायां तस्य प्रावीण्यं तु निस्सन्देहम्। तेन हि **विक्रमाङ्काभ्युदयं** स्वयं विरचितम्।

चतुर्थप्रकरणे षोडशाध्याये छन्दसां लक्षणानि निरुपितानि ग्रन्थकृता। तत्र दत्तानि बहून्युदाहरणानि तेनैव रचितानीति भावयामः। तेषां चारूतां परिचाययितुं द्वित्राण्यत्र दीयन्ते।

* हेतवे सर्वसिद्धीनां, कल्मषक्षयहेतवे।
भवाब्धिसेतवे तस्मै, नमस्तार्क्ष्यैककेतवे।।

* पाणौ सन्ततमच्युतार्चनकृते, पुष्पावचायग्रहः,
श्रीमन्माधवपादपद्मयुगल-ध्यानावधानं दृशोः।

कृष्णाराधनवासना च मनसि, प्रोद्भूतहर्षोद्गमे,
भूयात् केशव केशवेति वचसि, प्रौढः प्रलापो मम ।।

* वृन्दं वृन्दारकाणां, स्वयमरिसमरं, दृप्तदैत्येन्द्रहस्तात्,
पीयूषं येन जह्रे, स्फुटकपटवधू-वेषवैदग्ध्यभाजा ।
स श्रेयः प्राप्तिमूलं, दुरिततृणवन-प्लोषिसप्तार्चिरर्चि-
र्युष्मान् पुष्णातु लक्ष्मी-पतिरखिलजगद्-वन्दनीयो मुकुन्दः ।।

सोमेश्वरः कर्णाटदेशं शशासेत्यवोचाम। अतस्तस्य कन्नडभाषायामपि पाण्डित्यमासीदित्यत्र नाश्चर्यम्। कन्नडपद्यान्यपि स उदाहरति। राजान एवं विद्वत्त्वं च कवित्वं च प्राप्तवन्त आसन्निति महतः प्रमोदस्य स्थानम्। मानसोल्लासाध्ययनेन नानाशास्त्रप्रावीण्यं लभ्यत इति गन्थकृदुक्तं सत्यमेव।

मानसोल्लासस्य कश्चन लिपिकारो रामनामा यादवभूपतिः, सन्तोषाय प्रतिलिपिङ्कृत्वा तत्कालं सूचयति। यथा-

स्वस्ति श्री नृपशालिवाहनशके, नेत्राङ्कतिथ्युन्मिते,
प्रान्त्ये मासि सिते त्रयोदशतिथौ, पुष्ये शनेर्वासरे ।
श्रीमद्यादवराजभूपतिमुदे, खेर्डान्वयोऽलीलिखद्,
रामः सत्कृतिराज**मानससुखोल्ला**साभिधं पुस्तकम् ।।

# सिद्धार्थः

-*डॉ. रूपनारायणपाण्डेयः

(जर्मनमूलम्-हरमानहेसः, आङ्ग्लानुवादः-हिल्डारोसनेरः, संस्कृतानुवादः-मुनिकल्याणकीर्त्तिविजयः। प्रकाशकः - श्रीमद् भद्रङ्करोदयशिक्षणट्रस्ट गोधरा।
प्राप्तिस्थानम् : श्री विजयनेमिसूरीश्वरजी स्वाध्यायमन्दिर, १२, भगतबाग, नवा शारदा, मन्दिररोड, पालडी, अमदाबाद-३८० ००७। पृ.सं.-७+१६७/मू.-१५०/- प्रथम संस्करणम्-२०६० वि.)

विबुधवाण्यां वर्तमानकाले यद्यपि साहित्यक्षेत्रे महनीयैर्विद्वद्वर्यैस्तु केचिद् विश्वविश्रुता ग्रन्था अनूदिताः अनूद्यन्ते च, तथापि क्षेत्रेऽस्मिन् नितरां न्यूनता विद्यते। तां न्यूनतां किञ्चिद् दूरीकुर्वता श्रीमता मुनिकल्याणकीर्त्तिविजयेन 'सिद्धार्थः' इति ग्रन्थः प्रस्तुतः। जर्मनदेशोद्भूतो 'नोवेल'-पुरस्कारसमादृतः श्रीमान् हरमानहेसोऽस्य लेखकः। १८२३ तमे खिष्टाब्दे प्रणीतस्य, १८४६ तमे खिष्टाब्दे पुरस्कृतस्यास्य ग्रन्थस्याङ्गलभाषा रूपान्तरं श्रीमता हिल्डारोसनेरमहाभागेन विहितम्। तस्यैव रूपान्तरस्य देशभाषारूपान्तरमिदं ग्रन्थरत्नम्।

ग्रन्थेऽस्मिन् विभागद्वयं विलसति। प्रथमे विभागे 'ब्राह्मणस्य पुत्रः' इति शीर्षके-विद्वान् ब्राह्मणपुत्रः सिद्धार्थः स्वमित्रेण, गोविन्देन साकं पितुराज्ञामुपलभ्य श्रामण्यमङ्गीकर्तुं नगरात् निसृतः। 'श्रमणैः सह' इति शीर्षके तौ श्रमणदीक्षामुपलभ्य तपःसाधनायां निमग्नौ। सिद्धार्थः परकायप्रवेशसिद्धिं सम्प्राप्य विविधप्राणिनां शरीरेषु प्रवेशमपि चकार। गौतमस्य नाम श्रुत्वा तौ श्रामण्यं परित्यज्य तद्दर्शनाय प्रस्थितौ। 'गौतमः' इति शीर्षके तौ जेतवनं गत्वा बुद्धस्योपदेशं श्रुतवन्तौ। गोविन्दो बौद्धधर्मङ्गीचकार, किन्तु सिद्धार्थो। बुद्धेन साकं वार्तालापं विधाय तञ्च त्यक्त्वाग्रेऽगमत्। 'जागरणम्' इति शीर्षके सिद्धार्थो गोविन्दं विहाय विविधविचारनिमग्नो नूतनं बोधमनुभूतवान्। द्वितीये विभागे-'कमला' इति शीर्षके सः

* मनीकापुरा, सोरामः प्रयागः, २१२ ५०२, उ.प्र.

सुन्दरीं वाराङ्गनां कमलां विलोक्य तस्याः सामीप्यात् कामकलानन्दं शिक्षितुकामस्तां चुम्बितवान्। 'प्राकृतजनमध्ये' इति शीर्षके स कामस्वामिनो भृत्यत्वं, प्राप्तः, कमलया च शिक्षितस्तया साकं कामक्रीडासुखमनुबभूव। 'संसार' इति शीर्षके स लौकिको जन इव भोगासक्तो धनार्जनं चकार। द्यूतक्रीडायां मदिरापाने नारीभोगे च प्रमत्तो बभूव। एकस्मिन् दिने कमलाया अन्तिमं समागमसुखमनुभूय स्वकीयस्य पतनस्य च चिन्तनं विधाय नगरान्निर्गतः। 'नद्यास्तीरे' इति शीर्षके–स स्वपतनाद् निर्विण्ण एकास्मिन् सरित् तटे मरणाय समुपस्थितः। सहसा 'ओम्' इति ध्वनिमुच्चार्य गाढनिद्रायां निमग्नो, गोविन्दं दृष्ट्वा नवचेतनाञ्चाधिगम्य तस्या एव नद्यास्तटे न्युवास। 'नाविकः' इति शीर्षके स नाविकेन वासुदेवेन साकं मैत्रीं विधाय नौकाकार्यं चकार। मरणासन्नं बुद्धं श्रुत्वा सपुत्रा तद् दर्शनाय गच्छन्ती कमला सर्पदंशेन तस्य (सिद्धार्थस्य) निकटे मृता। 'पुत्रः' इति शीर्षके कमलायाः पुत्रस्य परिपालनाय तेन विविधा उपाया विहिताः, किन्तु कटुवचनमभिधाय स पलायितः। 'ॐ' इति शीर्षके स सुतस्य पलायनाद् नितरां विषण्णः स्वकीयस्य विगतजीवितस्य घटनाः संस्मरन् समग्रं व्यथां शनैः शनैः वासुदेवाय निवेदयामास। तेन सह नदीध्वनिसारं 'ओम्' इति श्रुत्वा वासुदेवो दिवङ्गतः अन्तिमे 'गोविन्दः' इति शीर्षके स गोविन्दस्य विविधप्रश्नानामुत्तरं दत्वा तं दिव्यप्रेमानुभूत्या परिपूर्णं चकार।

ग्रन्थात् प्राक् 'प्रास्ताविकम्' विलसति, येन ग्रन्थकारादीनां कश्चित् परिचयो ज्ञायते। अत्र यदि ग्रन्थकारस्य ग्रन्थादीनां विस्तृतं विवेचनं स्यात् तर्हि तत् पाठकान् प्रसादयेत्, विश्ववाङ्मयं प्रति च तेषां रुचि वर्धयेत।

वैदिकधर्मे प्रतिष्ठितस्य विद्वद्वर्यस्य ब्राह्मणस्य पुत्रस्य, श्रमणपरम्परायां दीक्षितस्य, परकायप्रवेशादिसाधनासम्पन्नस्य, भगवतो गौतमस्योपदेशं श्रुतवतः, वाराङ्गनया शिक्षितस्य, कामकलादक्षस्य, वाणिज्यकर्मचतुरस्य, द्यूतादिव्यसनेषु व्यासक्तस्य, नौकाचालनादिषु च निपुणस्य, प्रियमित्रस्य च गोविन्दस्य द्वितीयहृदयस्येव सिद्धार्थस्य जीवितस्योत्थानस्य, पतनस्य, परिवर्तनस्य, आत्मानुसन्धानस्य, आध्यात्मिकयात्रायाश्च कमनीया रमणीया चिन्तनीया च कथा ग्रन्थेऽस्मिन् मनोहरतया प्रस्तूयते। ग्रन्थकृता कृतं कथानायकस्य मनोभावानां मार्मिकं यथार्थपरकञ्च चिन्तनं हृदयं प्रसादयति, आध्यात्मिकसाधनायाः सत्यञ्च निष्कपटतयाऽभिव्यनक्ति। तद् यथा ''बाल्येऽहं देवताकार्येषु यागादिषु च निरत आसम्। तारुण्ये वैराग्यं धारयन्नहं, चिन्तने ध्याने च निष्ठोऽ भवम्।...अरण्ये निवसन्नहं शीतातपौ विसोढवान्, उपोषणमभ्यस्तवान्, स्वीयं देहञ्च जेतुं शिक्षितवान्। ततो महात्मनो बुद्धज्ञानञ्च मयि प्रवहमानमनुभूयते स्म। किन्तु तथापि मयि बुद्धं, तस्य भव्यं ज्ञानञ्च त्यक्तुमदम्या स्पृहा समुत्पन्ना। अहं ततो निर्गतवान् कमलायाः

सकाशाच्च कामसुखं कथं प्राप्तव्यमिति शिक्षितवान्, वाणिज्यं कामस्वामिनः सकाशात्। एतत् सर्वं वर्षाणि यावत् कृतवानहं मम प्रज्ञां नाशितवान्; विश्वैक्यं विस्मृतवान्, चिन्तनशक्तिं चोच्छेदितवान्। किमेतन्न सत्यं यदहं शनैः शनैर्बहूंश्च भ्रंशाननुभूय प्रौढपौरूषात् पुनरपि बालकतया परावर्तितः खलु चिन्तकात् प्राकृतो जनोऽभवम्।...किन्तु कीदृशोऽयं मार्गो यत्र मया बहूनि मौर्ख्यानि बहूनि पापाचरणानि, बहूनि स्खलनानि समाचरितानि, प्रभूतो निर्वेदः, भूयांश्च भ्रमः शोकश्चानुभूतः।...पुनर्जीवनं प्राप्तुं मया पापाचरणं कर्तव्यमेवाऽऽसीत्।

('सिद्धार्थः' पृ.१०५-१०६) मम मतौ कथायामस्यां सिद्धार्थो गोविन्देन सह वैदिकधर्मं ब्राह्मणत्वं वाऽपरिहाय सर्वं जीवितं साधनायां यापयेत् सिद्धिश्चाधिगच्छेत्।

यद्यपि ग्रन्थोऽयं जर्मनभाषात आङ्ग्लभाषायां ततश्च संस्कृतभाषायां श्रीमता मुनिकल्याणकीर्तिविजयेनानूदितः, तथापि महनीयेन तेन रूपान्तरकारेण नितरां परिश्रमेण, निष्ठया, तया च दक्षतया सुगमया भावाभिव्यक्तिसक्षमया भाषया च देववाण्यां रूपान्तरं विहितं येन ग्रन्थोऽयं नूतनो मौलिको हृदयहारकोऽतीवरोचकश्च प्रतीयते। एवं विश्वसाहित्येन साकं सुरभारतीमुपासकानां परिचयं कारयिता रूपान्तरकारोऽयं सर्वथाऽभिनन्द्यसत्त्वोऽस्ति। ग्रन्थोऽयं सर्वैः संस्कृतज्ञैः सर्वथा सङ्ग्राह्यः पठनीयश्च, आध्यात्मिकसाधनासंलग्नैश्च समाराधनीयः।

जयति संस्कृतं संस्कृतिश्च।

# १४ अगस्त्यः

- *डॉ. आचार्य रामकिशोरमिश्रः

भारतध्वज ! वन्दनन्ते।
अद्य ते गगने भ्रमन्तीम्,
आकृतिं विश्वीयदेशाः,
सर्पिणीमिव सञ्चलन्तीम्,
स्वकीयैरूत्फुल्लनयनै-
रेकचित्ता विलोकन्ते ।
भारतध्वज! वन्दनन्ते ।।१।।

अद्य भोः! इंग्लैण्डजाताः,
भारते सत्याऽऽग्रहेण,
निरधिकारास्तेऽनुजाताः।
परं विदधति भरतखण्डे,
सर्वदा कुरु क्रन्दनन्ते।
भारतध्वज! वन्दनन्ते ।।२।।

यथा देशे जलधिभङ्गाः,
यूनियनजेकस्थलेषु,
कम्पिताः सन्ति हि त्रिरङ्गाः।
सदा पश्यामः सहर्षम्,
खे सवायुस्पन्दनन्ते।
भारतध्वज! वन्दनन्ते ।।३।।

* डॉ. आचार्य रामकिशोर मिश्र २७५/७४ पट्टीहीरामपुरम्, खेकडा (नागपत) उ.प्र.२५०७०७

प्रभाते सह जयतुकारैः,
उत्तरे दक्षिणे पूर्वे,
पश्चिमे सह पुष्पहारैः ।
हिमकणैः सामुद्रभङ्गैः,
समं कुर्मः सिञ्चनन्ते।
भारतध्वज! वन्दनन्ते ।।४।।

यशो नस्तव यशसि केतो!
त्वदपमाने नोऽपमानः,
जयं याहि सदेति हेतोः।
तव कृते सन्त्यक्तप्राणाः,
वीरहृदयास्त्वयि रमन्ते।
भारतध्वज! वन्दनन्ते ।।५।।

# काव्यशास्त्रविनोदेन...

**- साध्वीजीश्री प्रशमनिधिश्रीः**

* श्रेयःकृद् किं वचः पुंसां?, धर्मः सर्वत्र कीदृशः?,
वीरस्य किं चलत्यद्य?, **जैनं जयति शासनम्** ॥१॥

* त्यक्तव्यं किं विरक्तस्य?, खाद्यं किं देहपाटवे? ।
बलं वित्तं भवेत् केषां, **सर्वं पथ्यं बलीयसाम्** ॥२॥

* सुज्ञः कुर्याद् विवादे किं?, निन्देत् कं नैव सर्वदा?।
गुरोराज्ञा विधत्ते किं?, **मौनमेव परं हितम्** ॥३॥

* जडानां श्री र्भवेत् कस्मै?, पुण्यानां किं पदे पदे?।
केषां सङ्गो न कर्त्तव्यः!, **मदाय विभवोऽसताम्** ॥४॥

* गीर्वाणानां किमाहारः?, कः स्यात् क्षणे क्षणे स्मृतौ।
प्रियस्य स्यादभीष्टं किं?, **पीयूषं प्रियदर्शनम्** ॥५॥

* नारीणां भूषणं किं स्यात्?, प्रीतिः कस्य भवेत् सुखे?।
वप्तव्यं सप्तक्षेत्रे किं?, **शीलं सर्वस्य सद्धनम्** ॥६॥

* करे सिद्धि र्भवेत् केषां?, किं भवेत् '**प्रशमः**' प्रभोः?।
का सदा निर्मलीकार्या?, **धीराणां भूषणं मतिः** ॥७॥

* दीक्षायुगप्रवर्त्तकशासनशिरताजाचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरीश्वराणां साम्राज्यवर्त्तिनी।

# सङ्क्लेशनाशाय

-अमृत पटेलः

मनसोऽन्तस्तले यत् किञ्चित् प्राकट्यमादधाति प्रादुर्भवति प्रोद्बिभर्ति, तस्य निरीक्षणं च करणीयमिति साम्प्रतसमये प्रस्तुतिमर्हति, चेतोऽतन्त्रं वा स्वतन्त्रं, तत् तु चेतोन्तस्तलादुद्भूतचिन्तनाच्चिन्तायाश्च प्रकाराज्ज्ञायते, यथा स चिन्तनचिन्तयोः प्रवाहः चैतन्यमयो वा चिद्रुपताऽऽधायी किमु? विद्यते, अथवा बाह्यविश्वस्य आघातजातप्रहाराणां प्रत्यघातोस्ति। दिने दिनेऽधुनातने यो माध्यस्थभावोऽनुभूयते सः, तथा मदीयकार्याणां मम मनसि पठनमननप्रयासः, ममैव मनसा यद् विधीयते, तस्य कारणगणानां शुद्धिः संशोधनं, तान् ज्ञातुं यः प्रयत्नः, स मम कृते मम व्यक्तित्वे-स्वभावे, तस्य प्रत्येक-पारिपार्श्विकान् मनः प्रवाहान् (पासाने) ज्ञातुं मनीषितुं, तथा महत्त्वतया तु, सविशेषं तु ममैव मनोमन्दिरे ममैव या प्रतिभा-प्रतिमा संखण्ड्यमाना चञ्चूर्यमाणा वरीवर्ति। तां यथासंभवं सन्धातुं समुचितां समुपयुक्तां युक्तिं मानसिकताऽऽधारितामाधातुं मार्गं दर्शयति दर्शयिष्यति वेत्यहं जानामि मां प्रतिभासते च। वस्तुतस्तु आघातप्रत्याघातयोः प्रबलप्रलम्बप्रगाढप्रवाहे प्रवर्तमाने, प्रत्येकानां कार्याणां कारणान्वेषणं राजिकापुञ्जे-सर्षपनिकरे सिद्धार्थसार्थेवा सूचिकासंशोधनमिव, तदपि निशानाथहीने प्रकाशलेशविहीने निशीथिनीसमये, यदाऽपि मां अहंरुपेण अहं पश्यामि-द्रष्टुं क्षमो भवामि, तथा चाहं 'मामेव किञ्चत् किञ्चित् श्रोतुं प्रारब्धवानस्मि, तदा 'मम दर्शन-श्रवणतः' एवं भाति यथाऽमावस्यायां, दर्शरजन्यां सूचिकाशोधनमिव यत्किञ्चित् तु मां मोहयेत् आभासिकमिव, किन्तु साफल्यमयमपि सञ्जायमानं प्रविभाति।

यदा यदा मम मन एव वावदूकमिव संभूय मम कार्यजातस्य (वर्तणूकस्य) प्रवृत्तिततेः रहस्यस्फोटं घटयति तदा 'ममैव वर्तनानि-प्रवृत्तयो, जडताऽज्ञानिता जनिताः,

सङ्क्लेशसङ्कीर्णा वा जानामि।

तदा चाकाङ्क्षेऽहं तथाविधं प्राज्ञं परमपदप्रस्थितं गुरुं, यो मम प्रवहमाने सांसारिकसङ्क्लेशगहने प्रवाहे सततात्यन्तगहनतिमिरभरे यः पन्थानं दर्शयेत्, यो मां चैतन्यमये प्रकाशितपथि नयेत्, किमपि चैतन्यं ज्ञानज्योतिः सङ्क्लेशलेशराहित्यं अनुभावयेत्, कोऽपि सहृदयो वयस्यो 'मम कल्याणमित्राऽऽकाङ्क्षां परिपूर्णतां प्रापयेत्। तं सहृदयं प्रकटितहृदयोहं प्रतीक्षे। यो मां निःसङ्क्लेशस्याराधनायां ग्रावसमानान् विघ्नान् जेतुं मूढतारहितां-मौढ्यविहीनां स्वस्थां मनीषां कारयेत्, निर्विघ्नं च साधना-ऽऽराधनाऽध्वनि गन्तुं, शुभप्रवृतौ वर्तितुं 'पथदर्शनं कारयेत्, ममोपरि च वात्सल्यमाधाय मम क्षतयश्च क्षमित्वा, क्षतिपथात् परावर्तयेत् प्रतिक्रामयेच्च।

स च गुरुः, स च कल्याणवयस्यः, एक एव जिनः-रागादिरिपून् विजित्य 'परममाध्यस्थे परमौदासीन्ये राजते, तन्मार्गे च मतिमन्तो ये जीवन्ति, जिनमेव शरणीकरोति स सद्गुरुः, योऽहिंसासंयमतपोमयेन ज्योतिषाऽस्मादृशां अदृशां परमसौहित्याध्वानं सन्दर्शयति। स चाऽध्वा जिनोक्त एव, पञ्चप्रकारान् महापातकान् नाशयितुमलं विद्यते। प्रान्ते-

**कारुण्यवात्सल्यमयं परं यन्-**
**मार्गं प्रदर्श्यात्र जिनो हि पाता।**
**श्रुत्वा च सृत्वा गुरुरेव पाता,**
**सङ्क्लेशनाशाय तमेव सेवे ।।१।।**

# वैश्विक: सखा

-*अनुवादक प्रा.चन्दुलाल व. ठकराल:

*** निष्कपटता ***

तथाऽऽचरणं कुरुत यथा विचाराणां शब्दानाञ्च मध्ये सुसंवाद: स्यात्।
तथाऽऽचरणं कुरुत यथा शब्दानां कार्याणाञ्च मध्ये सहमति: स्यात्।
तथाऽऽचरणं कुरुत येन शब्दकार्यविचाराणां सुसंवादो भवेत्।

*** जीवनादर: ***

गतिं कुर्वाणानि पशुपक्षिभूतानि च सर्वाणि प्रीतिसद्भावपूर्णाश्च प्रेमपूर्णाश्च भवत।
तानि प्रति दयालवो भवत सुन्दराणां पुष्पाणां लघू-उद्भिज्जानां
नाशनं मा कुरुत अनावश्यकतया।
एवं कृते यूयं समृद्धिपूर्णं सदुपयोगि च जीवनं जीवितुं क्षमा भविष्यथ।

*** प्रसन्नता ***

प्रतिदिनं हास्यं वैद्यात् दूरे वर्तितुं क्षमान् विदधाति।
सदा प्रसन्ना भवत परिस्थिति: सुखदा विपरीता वा भवतु नाम।
प्रसन्नताशून्यं मन: ऋणमेव।
प्रसन्नता युष्मान् आन्तरिकक्षमताया उपयोगाय प्रेरयिष्यति।
सा तु निष्फलतां साफल्याय परिवर्तिष्यति।

---

* एम. एच. स्वामी शिवानन्दजीकृताङ्लपुस्तकगतचिन्तनकर्णिकाया: सं. अनुवाद:

**✻ नित्यं कार्यमग्ना भवत ✻**

मधुमक्षिका इव सदा कार्यमग्ना भवत। मनः कस्मिन्नप्युपयोगिनि कार्ये रतं कुरुत।
सन्मित्राणां सङ्गं कुरुत। अलसं मस्तिष्कं दानवस्य कार्यशाला।
अलसानां सङ्गं मा कुरुत। नित्यं-निश्चितं क्रमं कार्याणां दृढं भजत।
निरिक्षणशक्तेः विकासं साधयत।
एवं यूयं स्मृतिशक्तिर्निर्णयबलत्वं प्राप्स्यथ।

**✻ समयः ✻**

मूल्यवान् खलु समयः। धनादतिरिच्य स मूल्यवत्तां भजते।
धने नष्टे पुनोऽर्जनं शक्यते। किन्तु यदि समयो नष्टस्तस्य पुनरवाप्तिः शक्या न।
नष्टः क्षणो न कथमपि पुनरायाति। जीवनं तु क्षणानां लघूनां सङ्कलनं नाम।
यदि सदुपयोगिरीत्योपयुक्तः स्यात् (समयः) क्षणः, यूयं महापुरुषत्वं प्राप्स्यथ।

**✻ सदाचरणम् ✻**

गहनतया विचारं कुरुत। यथातथ्यतया निर्णयं कुरुत।
सावधानतया कार्यं कुरुत। सत्यमेव वदत। युक्ति-प्रयुक्तिपूर्वकश्चरथ।
बुद्धिपूर्वकं कर्म कुरुत। मृदुतया वदथ। सम्यक्तयाऽऽचरणं कुरुत।
शब्दश्च विषयश्च मा विकृतं कुरुत। धूर्तताश्च वक्रताश्च दूरे कुरुत।

**✻ दानशीलता ✻**

दत्त, दत्त, दत्त । बहुलतया एतदेव रहस्यम्।
स्वेच्छापूर्वकं पात्रेभ्यो दत्त। स्वानि वस्तून्यन्यैः सहोपभुङ्क्त।
क्रियैषा युष्माकं हृदयं शुद्धीकरिष्यति तथा चेश्वरदर्शनं नेष्यति।
यूयश्च मरणरहितं नाम च यशश्चार्जयिष्यथ ।

**✻ स्वास्थ्यम् ✻**

समयपूर्वं शयनं कुरुत, अपि च समयपूर्वं प्रातः निद्रां त्यजत।
एवं कृत्वा यूयं स्वस्थाः सुदृढाश्च भविष्यथ। स्वास्थ्यकराणां वस्तूनां ही भोजनं कुरूत।
अतिशयं भोजनं मा कुरुत। सर्वदा व्यायामं कुरुत।

निसर्ग एव युष्माकं स्वास्थ्यदायको भवतु। मन एव सर्वेषां व्याधीनां मूलम्।
सदा प्रसन्ना भवत। समीचीनं स्वास्थ्यं सर्वेषां धनानां श्रेष्ठम्।

## ❊ आदर्शो बालको भव ❊

सरला भवत। विनम्रा भवत। सौम्या भवत। सच्चरित्रा भवत।
निष्कपटा भवत। अभया भवत। प्रसन्ना भवत।
विधायकोऽभिगमः कस्मिन्नपि कर्मणि सफलतामानयति सर्वदा।
नकारात्मकोऽभिगमः नैष्फल्यजनको भवति। सत्पुरुष इव ज्योतिर्युक्ता भवत।

## ❊ आत्मविश्लेषणम् ❊

शयनसमयात्प्राक् दिवससमये कृतानां दोषाणां विचारं कुरुत।
क्षमार्थं परमेश्वरश्च प्रार्थयत। बेन्जामिन् फ्रेन्कलिनः वासरिकां लिलेख स्वान् परिष्कारांश्च पुञ्जीकृतवान् यूयमप्येवं कर्तुं समर्थाः।
एवं कृत्वा यूयं स्वाः निर्बलता अपाकर्त्तुं तारकवच्च प्रकाशं धारयितुं समर्था भविष्यथ।

## ❊ स्वाध्यायः ❊

स्वकीयैः शालेयपाठैः सह युष्माभिः गीताबाइबल-
कुरानोपनिषदादिपवित्रग्रन्थानां स्वाध्यायः कर्तव्यः।
यत्किञ्चिदधीतं तदाचरणे योजयत।
एवं कृत्वाऽऽध्यात्मिकजीवने प्रगतिं साधयितुं तेजस्वितया
प्रकाशयितुञ्च शक्ता भविष्यथ।

**अेम. एच. स्वामी शिवानन्दजी लिखित**
**''युनिवर्स कोम्पेन्सन'' इति**
**आङ्लभाषानिबद्धपुस्तकस्य**
**संस्कृतानुवादः**




प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Matiksha
M.: 9820715236